ISSN- 2583-5629

# दीपशिखा

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागस्य ई-पत्रिका

चतुर्थः अङ्कः
(जनवरी, २०२३)



ISSN- 2583-5629

# दीपशिखा

(रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
संस्कृतदर्शनविभागस्य ई-पत्रिका)

चतुर्थः अङ्कः
(१२ जनवरी, २०२३)

उपदेष्टा

स्वामी आत्मप्रियानन्दः

मुख्यसम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्
बेलुडमठम्, हावडा, पश्चिमवङ्गः ७११२०२

प्रबन्धनसम्पादकः

स्वामी जपसिद्धानन्दः

सम्पादकमण्डली

डॉ. वेङ्कटरमणभट्टः
डॉ. गोपीकृष्णन् रघुः
डॉ. नागराजभट्टः
डॉ. नीरजकुमारभार्गवः
स्वामी वेदार्थानन्दः
डॉ. शन्तनुः अयाचितः
डॉ. सुखदेवभट्टः

सम्पादनसहायकाः

डॉ. सुकान्तमान्ना
शान्तनुनायेकः

# सूची


| क्रमः | प्रबन्धः (पठितुं शीर्षकं नुदतु) | लेखकः | पुटसङ्ख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | सम्पादकाः | १ |
| २. | श्लोकपरिचयः– अनाघ्रातं पुष्पम्... (पदच्छेद-अन्वय-अन्वयार्थादिसहितः) | रणितनायेकः | २ |
| ३. | यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् | शुभङ्कर दासः | ५ |
| ४. | स्वामिविवेकानन्दविरचितं श्रीरामकृष्णावतारस्तोत्रम् (ह्लादिनीदर्पणा टीका) | आवीरलाल-गङ्गोपाध्यायः (टीकाकर्ता) | ९ |
| ५. | हिन्दुधर्मः श्रीरामकृष्णश्च (स्वामी विवेकानन्दः) | स्वामी वेदार्थानन्दः (अनुवादकः) | १६ |
| ६. | छात्रस्य परीक्षा (रवीन्द्रनाथठाकुरः) | डॉ. सुकान्तमान्ना (अनुवादकः) | १९ |
| ७. | स्वामिसारदानन्दकृतः श्रीरामकृष्णलीलाप्रसङ्गः (अंशविशेषस्य अनुवादः) | डॉ. राकेशदाशः, शान्तनुनायेकः (अनुवादकौ) | २२ |
| ८. | स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम् (अंशविशेषस्य अनुवादः) | ब्रह्मचारी मनोमयः (अनुवादकः) | २५ |
| ९. | स्वामिब्रह्मानन्दसङ्कलितः श्रीश्रीरामकृष्णोपदेशः (अंशविशेषस्य अनुवादः) | ब्रह्मचारी शुभदीपः (अनुवादकः) | २८ |

# सञ्चारिणी दीपशिखा

दीपशिखायाः चतुर्थः अङ्कः पूज्यानां विवेकानन्दस्वामिचरणानां जन्मदिने प्राकट्यम् आगतः इति उद्घोषयन् महान्तं सन्तोषम् अनुभवामि। अष्टाभिः लेखैः सुशोभितः अयम् अङ्कः नूनं पाठकानां हर्षं तनुयाद् इति आशास्महे। अभिज्ञानशाकुन्तलस्य प्रसिद्धं श्लोकम् अन्वयपदार्थादिपुरस्सरं व्याख्यातवान् BA-वर्गे द्वितीयवर्षे अध्येता रणितनायेकः श्लाघार्हः। स्वामिविवेकानन्दप्रणीतस्य श्रीरामकृष्णस्तोत्रस्य टीकाम् अरचयद् आवीरलालः। प्राचीनटीकाकृतां शैलीं भाषां प्रौढिमानं च अनुकुर्वतः अस्य टीकाकारस्य शास्त्रचर्चापरम्परायां नदीष्णता अनया ऊह्यते। विशेषतः येन स्वरेण इदं स्तोत्रं गीयते तस्य स्वरस्य अपि रागादिसंयोजनं कथम् इति विचारयन् एष लोकस्य महद् उपकरोति इति निश्चप्रचम्। स्वामिविवेकानन्दस्य प्रख्यातं भाषणं हिन्दुधर्मः श्रीरामकृष्णश्च इति शीर्षकाङ्कितं संस्कृते अनूद्य वेदार्थानन्दस्वामी कार्तज्ञ्यभाग् भवति। इत्थं श्रीरामकृष्णलीलाप्रसङ्गस्य अनुवादाय धन्यतावचनैः भूष्यते शान्तनुनायेकः। अपि च, पूज्यैः गम्भीरानन्दस्वामिभिः विरचितस्य ब्रह्मानन्दस्वामिपादानां जीवनवृत्तस्य तथा च वन्दनीयचरणारविन्दैः ब्रह्मानन्दस्वामिपादैः सङ्कलितानां श्रीश्रीरामकृष्णोपदेशानाम् अनुवादं कृतवद्भ्यां ब्रह्मचारिभ्यां मनोमय-शुभदीपाभ्यां कृतज्ञता व्यज्यते।

प्रसङ्गेऽस्मिन् विश्वविद्यालयस्य प्रतिकुलाधिपतीनां श्रीमताम् आत्मप्रियानन्दस्वामिचरणान्, विभागाध्यक्षान् जपसिद्धानन्दस्वामिपादान् च प्रणमामः। पत्रिकायाः सम्पादने यथायथं साहाय्यम् आचरितवतां समेषां सकार्तज्ञ्यं स्मृत्वा विरमामो विस्तरात्।

मुख्यसम्पादकः

# श्लोकपरिचयः

अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः
(पदच्छेद-अन्वय-अन्वयार्थादिसहितः)

रणितनायेकः

अनाघ्रातं पुष्पं किसलयम् अलूनं कररुहै-
रनाविद्धं रत्नं मधु नवम् अनास्वादितरसम्।
अखण्डं पुष्पाणां फलम् इव च तद्रूपम् अनघं
न जाने भोक्तारं कम् इह समुपस्थास्यति विधिः॥

**भूमिका** संस्कृतसाहित्यवीथिकायां कविचक्रचूडामणिना महाकविकालिदासेन विरचितस्य अभिज्ञानशाकुन्तलमिति नाटकस्य द्वितीयाङ्के समुपलभ्यतेऽयं श्लोकः।

**पदच्छेदः** अनाघ्रातं पुष्पं किसलयम् अलूनं कररुहैः अनाविद्धं रत्नं मधु नवम् अनास्वादितरसम् अखण्डं पुण्यानां फलम् इव च तद् रूपम् अनघं न जाने भोक्तारं कम् इह समुपस्थास्यति विधिः।

**अन्वयः** अनाघ्रातं पुष्पम् इव कररुहैः अलूनं किसलयम् इव अनाविद्धं रत्नम् इव अनास्वादितरसं नवं मधु इव अखण्डं पुण्यानां फलम् इव च अनघं तद्रूपं विधिः इह कं भोक्तारं समुपस्थास्यति इति न जाने।

**पदपरिचयः**

| | | |
|---|---|---|
| अनाघ्रातम् | – | न आघ्रातं नासिकाविषयीकृतम् इति अनाघ्रातम्। नञ्तत्पुरुषसमासः। विशेषणम्। प्रथमायाः एकवचनम्। |
| पुष्पम् | – | पुष्प इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाम् एकवचनस्य रूपम् इदम्। |
| इव | – | अव्ययम्। |
| कररुहैः | – | करे रोहति इति विग्रहे कर इति उपपदपूर्वकाद् रुह्-धातोः क-प्रत्ययः (इगुपधज्ञाप्रीकिरः कः इति सूत्रेण कप्रत्ययः)। करणे तृतीयायां बहुवचने रूपम्। |
| अलूनम् | – | लञ् छेदने इति धातोः क्तप्रत्यये लूनम्। न लूनम् अलूनम् इति नञ्तत्पुरुषसमासः। प्रथमायाः एकवचनस्य रूपम् इदम्। |
| किसलयम् | – | किसलय इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। |
| इव | – | सादृश्येऽर्थे अव्ययम्। |
| अनाविद्धम् | – | आ इति उपसर्गपूर्वकात् व्यध ताडने इति धातोः कर्मणि क्तप्रत्यये आविद्धम्। न आविद्धम् इति अनाविद्धम् इति नञ्तत्पुरुषसमासः। विशेषणमिदम्। प्रथमायाः एकवचनस्य रूपम् इदम्। |
| रत्नम् | – | रत्न इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। |
| इव | – | सादृश्येऽर्थे अव्ययम्। |


*dīpaśikhā*/v1/2023/Ranit Nayek/pp. 2-4

| | | |
|---|---|---|
| अनास्वादितरसम् | – | आ इति उपसर्गपूर्वकात् स्वद आस्वादने इति चुरादिगणियात् धातोः कर्मणि क्तप्रत्यये आस्वादितम् इति। आस्वादितो रसो यस्य तद् आस्वादितरसम् इति बहुव्रीहिसमासः, न आस्वादितरसम् इति अनास्वादितरसम् इति नञ्तत्पुरुषसमासः। विशेषणम्। प्रथमायाः एकवचनस्य रूपम् इदम्। |
| नवम् | – | नव इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। विशेषणम्। |
| मधु | – | मधु इति उकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। |
| इव | – | साद्दश्येऽर्थे अव्ययम्। |
| अखण्डम् | – | न खण्डो विभागो यस्य तद् अखण्डम् इति बहुव्रीहिसमासः। विशेषणम्। प्रथमायाः एकवचनस्य रूपम् इदम्। |
| पुण्यानाम् | – | पुण्य इति अकारान्तक्लीबलिङ्गशब्दस्य षष्ठ्याः बहुवचनस्य रूपम् इदम्। |
| फलम् | – | फल इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। |
| इव | – | साद्दश्येऽर्थे अव्ययम्। |
| च | – | अव्ययम्। |
| अनघम् | – | अविद्यमानम् अघम् अस्य इति विग्रहे नञोस्त्यर्थानां च इति वार्तिकेन बहुव्रीहिसमासः। यस्मिन् तद् अनघम् इति बहुव्रीहिसमासः। विशेषणम्। प्रथमायाः एकवचनस्य रूपम् इदम्। |
| तत् | – | तद् इति सर्वनामशब्दस्य क्लीबलिङ्गैकवचनस्य रूपम् इदम्। |
| रूपम् | – | रूप इति अकारान्तक्लीबलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। |
| विधिः | – | विधि इति इकारान्तपुंलिङ्गशब्दस्य प्रथमायाः एकवचनस्य रूपम् इदम्। |
| इह | – | अव्ययम्। |
| कम् | – | किम् इति सर्वनामशब्दस्य पुंलिङ्गे द्वितीयायाः एकवचनस्य रूपम् इदम्। |
| भोक्तारम् | – | भोक्तृ इति ऋकारान्तपुंलिङ्गशब्दस्य द्वितीयायाः एकवचनस्य रूपम् एतत्। |
| समुपस्थास्यति | – | सम् इति उपसर्गपूर्वकात् तथा उप इति उपसर्गपूर्वकात् ष्ठा गतिनिवृत्तौ इति धातोः लृटि प्रथमपुरुषैकवचनस्य रूपम् एतत्। |
| इति | – | समाप्त्यर्थकम् अव्ययम्। |
| न | – | निषेधार्थकम् अव्ययम्। |
| जाने | – | ज्ञा अवबोधने इति धातोः उत्तमपुरुषैकवचनस्य रूपम् इदम्। |

**अन्वयार्थः** न नासिकाविषयीकृतं कुसुमम् इव; नखैः अच्छिन्नं पल्लवम् इव; असूचिभिन्नः मणिः इव; अगृहीतास्वादम् अनुच्छिष्टं च नवं मधु इव; तद् अखण्डं परिपूर्णम्; अनेकजन्मार्जितानां सुकृतानां परिणाम इव सुदुर्लभं निष्पापं शकुन्तलालावण्यम्। ब्रह्मा अत्र जगति कं भाग्यवन्तं पुरुषं उपभोगकर्तारम् उपस्थितं करिष्यति इति नाहं वेद्मि।



*dīpaśikhā*/v1/2023/Ranit Nayek/pp. 2-4

**प्रसङ्गनिर्देशः** राजा दुष्यन्तः कण्वदुहितरं शकुन्तलां यदा सखीभ्यां साकं दृष्टवान् तदैव तस्याम् आसक्तो जातः। किन्तु, तद्विरहाद् राजा आश्रमपार्श्वस्थवने एव स्वमित्रैः सह अतिष्ठत्। कदाचिद् राजा स्वमित्रं विदूषकं प्रति शकुन्तलायाः रूपम् अनेन श्लोकेन वर्णयति।

**सरलार्थः** विदूषकस्य “यद्येवम्, प्रत्यादेश इदानीं रूपवतीनाम्” इति कथनं समर्थयन् राजा शकुन्तलायाः लौकिकसौन्दर्यविषये इत्थं वदति यत् शकुन्तलाया निर्दोषं रूपं तथैव विद्यते यथानाघ्रातं कुसुमम्, नखैरच्छिन्नं नवपल्लवम्, अक्षतं रत्नम्, अगृहीतास्वादं नूतनं मधु इव। सुकृतानां सम्पूर्णं फलम् इव च तद् (रूपम्) ब्रह्मा संसारे कम् उपभोगकर्त्तारम् उपनेष्यतीति न जाने। विशालेऽस्मिन् लोके कः सौभाग्यशाली जनः एतादृशस्याप्रतिमरूपस्योपभोक्ता भविष्यति इति तु अज्ञातम् एव।

**व्याख्या** महाकविकालिदासः अनेन श्लोकेन शकुन्तलायाः रूपलावण्यं प्रकटयति। राजा दुष्यन्तः वैखानसेन प्रेरितः सन् कण्वाश्रमं प्रविवेश। किञ्च, तत्र शकुन्तलां दृष्ट्वा तस्याः रूपलावण्येन मुग्धोऽभूत्। ततः राजा शकुन्तलायाम् आसक्तः सन् आश्रमपार्श्वस्थवने एव अनुचरैः सह उवास। तासु प्रजासु एतद्वृत्तान्तं ज्ञातवते राज्ञः प्रियमित्राय विदूषकाय अरण्यनिवासमिदं न रोचते स्म। अतः स वैरस्यतया राजानं कथयञ्चकार, “भोः राजन्! यथा पिण्डीखर्ज्जुरैरुद्वेजितस्य तिन्तिड्यां श्रद्धा भवति, तथा अन्तःपुरस्त्रीरत्नपरिभोगिनो भवत इयं प्रार्थना” इति। एतच्छ्रुत्वा राजा मनःस्थितां शकुन्तलायाः अनिन्द्यस्य अकलङ्कस्य च रूपस्य पवित्रताम् अन्यास्पृष्टतां सौभाग्यशालिलभ्यतां च विदूषकस्य पुरस्तात् प्रकाशयति यत् तस्याः वपुः अकृताघ्राणं पुष्पमिव विद्यते। अर्थात् केनापि तस्याः वपुः न घ्रातमित्यर्थः। किञ्च नखैः अच्छिन्नं पल्लवम् इव कोमलमस्ति। तथा वेधरहितं रत्नमिव सा तथा अनास्वादितं सद्यः जातं मधु इव सा, तस्या इदं पुण्यानाम् अनेकजन्मार्जितानां सुकृतानां फलं विद्यते। ब्रह्मा इह जगति कं भाग्यवन्तम् उपस्थास्यति इति न ज्ञायते राज्ञा।

**अलङ्कारः** अस्मिन् श्लोके एकस्याः शकुन्तलायाः बहुभिः उपमितत्वाद् मालोपमालङ्कारः। अनाघ्रातम्, अलूनम्, अनाविद्धम् इत्यादिभिः विशेषणैः विशेषाभिप्रायः प्रकटितः भवति। शकुन्तला अन्येन केनचिद् अस्पृष्टा अस्ति इति अभिप्रायः विशेषणैः प्रकटितः इति कारणेन परिकरालङ्कारः अपि अत्र अस्ति। उभयोः परस्परं पृथक्करणासमर्थतया सङ्करः। परिकरालङ्कारप्रयोजकैः विशेषणैः शकुन्तलायाः देहसौष्ठवं निर्दुष्टम् अभिनवं च अस्ति इति वस्तु अपि व्यज्यते इति वस्तुध्वनिः। दुष्यन्तः अत्र शकुन्तलायाः गुणान् कीर्तयति। तस्माद् गुणकीर्तनं नाम नाट्यलक्षणम्। राजा कामस्य चतुर्थीं दशां प्राप्तवान् अस्ति इति स्पष्टं प्रतीयते।

**छन्दः** अस्मिन् श्लोके शिखरिणीच्छन्दो विद्यते। तस्य छन्दसः लक्षणं तावत्– “रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी” इति।

# यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्

शुभङ्कर दासः

भारतीयसंस्कृतेः आधारशिलयोरन्यतमम् इदं कृष्णद्वैपायनविरचितं महाभारतम्। न नूनमस्य ग्रन्थस्य उद्देश्यं कौरव-पाण्डवयोः युद्धवर्णनम्, अपि तु भारतीयधर्मस्य कात्स्न्र्येन सविस्तरं चित्रणम्। सुजीवनादर्शं ख्यापयद् न्यायान्यायविवेकपूर्वकं धर्मशास्त्रस्यापि कार्यं कुरुते शास्त्रमिदम्। महाभारतस्यास्य गुणकीर्तनावसरे प्राप्यते श्लोकोऽयम्–

धर्मे ह्यर्थे च कामे च, मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥ इति।

श्लोकस्थेन “यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्” इति वाक्येन अखिलसंसारस्य सारः सङ्ग्रहश्चात्र महाभारते लभ्यते इत्यवबोधितम्। तत्कथमिति विविधविषयान् आश्रित्य अधः विचारितम्।

## १. महाभारते पुरुषार्थोपदेशः

पुरुषैः अर्थ्यमानाः चत्वारः पुरुषार्थाः धर्मार्थकाममोक्षाः प्रसिद्धाः शास्त्रेषु लोकाचारेषु च। तत्र नैके मोक्षपरकाः दार्शनिकग्रन्थाः, धर्मपरकाः यज्ञादिग्रन्थाश्च प्राप्यन्ते, परन्तु अतिविरलाः ते ग्रन्थाः, यत्र एकत्र सर्वे पुरुषार्थाः व्याख्याताः। तथाहि-

**१.१. धर्मः** कृत्याकृत्यविवेकैः नीरक्षीरविवेचनपूर्वकं जीवनं यापयन्ति विचक्षणाः। स च कृत्याकृत्यविवेकः धर्मशास्त्रग्रन्थे उल्लिखितः। कश्च धर्मः इति चेदुच्यते– ध्रियते अनेन इति धर्मः इति। तथाह्युक्तं महाभारते–

ध्रियते धर्म इत्याहुर्धर्मो धारयते प्रजाः।
तस्माद्धर्मो न हन्तव्यः, धर्मो रक्षति रक्षितः॥ इति।

महाभारते भूरिशः धर्माधर्मविचारः प्राप्यते। यथात्र श्रीकृष्णार्जुनयुधिष्ठिरभीष्मविदुरादीनां धर्ममार्गः, तथैव च दुर्योधनादीनाम् अधर्मानुसरणमपि व्याख्यातमत्र, येन मानवाः द्वयोः स्पष्टतरविवेकेन धर्ममार्गेण जीवनम् अतिवाहयितुं शक्नुयुः। यक्षयुधिष्ठिरसंवादे धर्मः न नूनम् उपदेशमात्रम्, अपि तु जीवनाचरणमेवेति ज्ञापितम्। तत्र चोक्तं युधिष्ठिरेण–

यशः सत्यं दमः शौचमार्जवं ह्रीरचापलम्।
दानं तपो ब्रह्मचर्यमित्येतास्तनवो मम॥ इति।

द्विविधो हि धर्ममार्गः प्रवृत्तिः निवृत्तिश्चेति। श्रीशङ्करभगवत्पादानां व्याख्यानानुसारम् अभ्युदयलक्षणः सांसारिकमार्गः प्रवृत्तिमार्गः, मोक्षशास्त्रविचारभूतः परमात्मभावलक्षणः श्रेयोमार्गश्च निवृत्तिमार्गः इत्युच्यते। तत्र प्रवृत्तिमार्गे कः आदर्शः अवलम्बनीयः इति विषये द्विजव्याधसंवादे व्याख्यातम्–

के न हिंसन्ति जीवान् वै लोकेऽस्मिन् द्विजसत्तम।
बहु सञ्चिन्त्य इह वै नास्ति कश्चिदहिंसकः॥ इति।

**१.२. अर्थकामौ** चरित्रोन्नत्यै यानि स्वस्वकालवर्णोचितकार्याणि प्रख्यातानि, तान्येव अर्थकामादिषु


*dīpaśikhā*/v1/2023/Subhankar Das/pp. 5-8

च सहायकानि भवन्ति। अर्थशास्त्रीया आधुनिकी विद्या, प्राचीनसामाजिकादर्शश्च प्रदर्शितं प्रकृते। सुजीवनयापनाय अर्थोपार्जनम्, संरक्षणम्, भोगश्चेति त्रयो विषयाः अपेक्षन्ते। अत एव अर्थकामयोः प्रेरयति महाभारतम्, यथा–

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥ इति।

तस्माद्धि अर्थोपार्जनसाधनोपदेशाय कृष्यादयो व्याख्याताः। प्रोक्तञ्च– "न स समितिं गच्छेत् यश्च नो निर्वपेत् कृषिम्॥" इति।

**१.३. मोक्षः** अस्मिन्नेव महाभारते भीष्मपर्वणि श्रीमद्भगवद्गीता प्रख्याता, या च परमात्मदर्शनरूपं मोक्षम् उपदिशति। अस्य च ग्रन्थस्य अष्टादशसु अध्यायेषु मोक्ष एव मूलतः प्रतिपादितः। अस्य च ग्रन्थस्य विविधवेदान्ताचार्याणां स्वस्वदार्शनिकमतानुसारं व्याख्याः दृश्यन्ते। अस्माच्च ग्रन्थाद् उपनिषदुक्ततत्त्वानि उपलभ्यन्ते, यथा– ज्ञानकर्मादिमार्गाः, ब्रह्मविद्या, आत्मज्ञानम् इति। तेनात्र चत्वारोऽपि पुरुषार्थाः व्याख्याताः इति स्पष्टम्।

ननु इमे चत्वारः पुरुषार्थाः अन्यत्रापि महाकाव्यादिषु लभ्येरन्, कथमस्यैव गरिमोक्तिः– "न तत् क्वचिद्" इति चेदुच्यते यत्, इतरे ग्रन्थाः पुरुषार्थवर्णनेनैव समाप्ताः, अत्र तदतिरिच्यापि नैके तादृशाः विषयाः वर्णिताः, येषु केचन धर्मशास्त्रादौ प्राप्यन्ते, केचन वा साहित्यशास्त्रे, केचन वा अन्यत्र शास्त्रान्तरे। परन्तु तेषां समेषां सङ्गमो हि नान्यत्र, अपि तु महाभारते एवेति युक्तास्य गरिमोक्तिः।

## २. महाभारतस्य सामाजिकोपदेशः

विविधसामाजिकोपदेशाः प्राप्यन्ते महाभारतात्, ये चोपदेशाः आदर्शजीवनयापनाय आलम्बनभूताः। तादृशाः केचन उपदेशाः यावत्– भीष्मस्य पितृभक्तिः, एकलव्यार्जुनयोः गुरुभक्तिः, पुत्रपुत्र्योः साम्यमित्यादयः। तथाह्युक्तं महाभारते–

"यथैवात्मा तथा पुत्रः, पुत्रेण दुहिता समा॥" इति।

साम्प्रतिके काले नारीपुरुषयोः साम्यविषये सर्वकारैः यः प्रयत्नः विधीयते, तस्य मार्गदर्शनं तु सुप्राचीने महाभारते एव पूर्वतः प्रदत्तम्। अपि च, गान्धारी-कुन्ती-द्रौपदी-सुभद्रादिनारीणां यत् सामर्थ्यं कर्तव्यबोधः नेतृत्वञ्च प्राप्यते तद् अद्यतनीयनारीणां सर्वक्षेत्रेषु साम्यावदाने विविधकार्येषु नेतृत्वप्रदाने च प्रेरकं भवति। अभ्युन्नत्या सह नीतिमार्गोऽपि उपदिष्टः चतुराश्रमिणाम् आदर्शजीवनोपदेशज्ञापनेन। तथाहि–

१. ब्राह्मणस्य यज्ञाध्ययनदानादयः।
२. क्षत्रियस्य राज्यपालनादयः।
३. वैश्यस्य कृषि-पशुपालन-वाणिज्यादयः।
४. शूद्रस्य द्विजादित्रयाणां वर्णानां सेवा।

## ३. महाभारते राजधर्मः

राजा यथा चरते लोकस्तदनुवर्तते इति श्रूयते लोके, तस्माद् राज्ञा विचक्षणेन भाव्यम् इति नीतिम् अनुसृत्य आदर्शराजधर्मो व्याख्यातः प्रकृते। महाभारतस्थराजधर्मज्ञानं विना कोऽपि पूर्णतया राजनीतिविलक्षणो भवितुं नार्हति इति विदुषां मतम्। राजनीतेः नेतारं प्रति महाभारतं महनीयम् आदर्शम् उपस्थापयति। सुधर्मसंस्थापनस्य उत्तरदायित्वं राज्ञामेव इति कथयति ग्रन्थोऽयम्।

इत्थमपि उल्लिखितमत्र यत्, यदि राजा प्रजापालनं न कुर्यात्, तर्हि न नूनं प्रजानामेव क्षयः, अपि तु वैदिकधर्मस्यापि लोपः स्यात्। तस्माद् राज्ञा कथं स्थेयमिति विषये प्रोक्तम्–

मृदुर्हि राजा सततं, लङ्घ्यो भवति सर्वशः।
अवमन्यन्ति भर्तारं, संघर्षादुपजीविनः।
स्वस्थाने न तिष्ठन्ति, लङ्घयन्ति च तद्वचः॥ इति।

किञ्च, राजधर्मे नष्टे सति राष्ट्रस्य नाशो भवति। तस्माद्धि "राजा राजपुरुषाणां मेरुदण्डः" इत्यादिवचोभिः महाभारतम् उच्चैः राजधर्मस्य उत्कृष्टताम्, राजनीतेः उपादेयताञ्च ख्यापयति।

## ४. महाभारतस्य साहित्यिकमहत्त्वम्

"शब्दार्थौ सहितौ काव्यम्" इति आचार्यभामहस्य काव्यलक्षणादारभ्य काव्यस्य यावन्ति प्रयोजनानि प्रोक्तानि, तानि सर्वाणि महाभारते उपलभ्यन्ते। तथाहि–

**४.१. गुणः रीतिश्च** काव्यशास्त्रीयदृष्ट्या महाभारते पाञ्चालीरीतिः वर्तते। तत्र च पाञ्चालीरीतेः लक्षणं प्रोक्तम्–

"शब्दार्थयोः समो गुम्फः पाञ्चालीरीतिरिष्यते॥" इति।

गुणेष्वपि ये त्रयो गुणाः प्रख्याताः आलङ्कारिकसम्प्रदाये ओजः, प्रसादः, माधुर्यञ्चेति, तेषां त्रयाणामेव भूरिशो दृष्टान्ताः प्रतिपदं प्राप्यन्ते महाकाव्येऽस्मिन्।

**४.२. रसः** रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः इति पण्डितराजजगन्नाथवचनात् काव्यस्य हृदयं ह्यं रसः, यश्च नवविधः। श्रूयते च साहित्यदर्पणे श्लोकोऽयम्

श्रृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्यष्टौ शान्तोऽपि नवमो रसः॥ इति।

यद्यपि महाभारते नैके रसाः प्राप्यन्ते, यथा- १. सुभद्रार्जुनयोः परिणयवेलायां श्रृङ्गारः, २. सभापर्वणि हास्यम्, ३. युद्धवेलायां वीरः, ४. दुःशासनादिवधकाले बीभत्सः, ५. अभिमन्युप्रभृतीनां वीरगतिकाले करुणः; तथापि मुख्यतः अत्र अङ्गिरसस्तावत् शान्तः एव।

**४.३. अलङ्कारः** शब्दार्थभेदेन अलङ्कारो द्विविधो मतः। तेषु शब्दालङ्कारेषु महाभारते मुख्यतः अनुप्रासः, अर्थालङ्कारेषु उपमारूपकोत्प्रेक्षादयः प्राप्यन्ते। तत्र अनुप्रासस्य एकः दृष्टान्तस्तावद् भीमवर्णनप्रसङ्गे–

"भीमो भीमपराक्रमः। अशोकः शोकनाशनः॥" इति।

**४.४. छन्दः** छन्दःपादौ तु वेदस्य इति पाणिनीयवचनाद् वेदान्ताङ्गान्तर्भूतमिदं छन्दः काव्याङ्गेषु अन्यतमम्। महाभारते यद्यपि विविधपर्वणि मध्ये मध्ये विविधच्छन्दस्सु श्लोकाः प्राप्यन्ते, तथापि बाहुल्येन अनुष्टुप्छन्दसि एव श्लोकाः उपलभ्यन्ते। न नूनम् एतावतैव समाप्तोऽयं काव्यमहिमा महाकाव्यस्यास्य। प्रकृतेऽस्मिन् पद्यात्मककाव्येन सह गद्यात्मकभामोऽपि क्वचित् प्राप्यते, यद्धि चम्पूकाव्यलक्षणमिति आमनन्ति साहित्यिकाः। लक्षणं चोक्तं महाकविना दण्डिना "गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते" इति। समर्थितञ्चेदं महाभारतस्य ख्यातिप्रसङ्गे–

"अलङ्कृतैः शुभैः शब्दैः छन्दोवृत्तैश्च विविधैः॥" इति।

एतावता सर्वविधविषयाणां महाप्रयोगभूतमिदं महाभारतम् इति यद्यपि प्रतिपादितम्, तथापि

अस्यैकं विशिष्टं वैलक्षण्यं वर्तते। तथाहि न नूनमिदं सत्यवृत्तान्ताधारेणैव रचितत्वाद् ऐतिहासिकमिति, अद्यपर्यन्तं सनातनधर्मवद् देदीप्यमानत्वात् प्रतिक्षणम् उपयुक्तत्वाच्च पुराणमपि।

तस्माद् यथात्रस्था नीतिः स्वाधीनतासङ्ग्रामकाले पथप्रदर्शिकासीत्, एवमद्यापि अमृतमहोत्सववेलायां पाथेयभूतेत्यतः युक्तं वचनमिदम्- "यदिहास्ति तदन्यत्र यन्नेहास्ति, न तत् क्वचित्" इति शिवम्॥



# श्रीरामकृष्णावतारस्तोत्रम्

श्रीमद्विवेकानन्दस्वामिविरचितम्

## आवीरलाल-गङ्गोपाध्यायविरचिता ह्लादिनीदर्पणा टीका

प्रभानन्दं गुरुं नत्वा रामकृष्णं जगद्गुरुम्।
मातरं सारदां नौमि ब्रह्मानन्दं स सङ्घराट्॥

शिरो मे स्थापये तत्र विवेकानन्दपादयोः।
अन्यांश्च पार्षदान् नौमि लीलाकारादिसंयुतान्॥

किमस्तीह मतौ स्वल्पं वेदगर्भान्वयस्य मे।
यच्चादाय स्वामिपादवचोव्याख्यान उद्यतः॥

तथापि तस्य पुत्रोऽस्मीत्येवंरूपविनिश्चये।
आधम्यं श्रैष्ठ्यमेतीह क्व दौर्बल्यमितः परम्॥

तस्माद् या भारतीशम्पा दृश्यते स्वामिवाग्घने।
तदादर्शसमा ह्येषा ह्लादिनीदर्पणा मम॥

यथा हि मुकुरे स्वच्छे बिम्बनैर्मल्यमिष्यते।
तथैवास्यां स्पष्टता मे धियश्च निकषोपलः॥

भवेद्वाऽसफलो ह्येष प्रयासश्चेन्न दुःखदः।
अकार्ये जाड्यमेवास्ति कर्मैव खलु जीवितम्॥

**उपोद्घातः** तत्रभवन्तो द्वितीयचित्रभानुसङ्काशभारतघनस्वप्नतमोजाड्यरुद्रश्रीमद्विवेकानन्दस्वामिचरणा यतिगणशिरोवतंसा निरन्तरजनकल्याणघनसत्त्वतापसा अर्धबाह्यावस्थाः सन्तो दृश्यचित्रपटस्फुटस्ववाणीविषयीभूतम् एतद्युगपुरुषावतारतत्त्वमाहात्म्यं प्रकटीकुर्वन्ति **आचण्डाले**त्यादिना। तत्र यद्यपि नास्त्यस्य स्तोत्रस्य श्रीरामकृष्णावतारस्तोत्रनामधेयम्। तथापि तत्पूर्वपूर्वावतारसत्त्वाकलनपुरःसरो यश्चास्ति नवीनस्तस्य भगवतो नित्यशुद्धबुद्धमुक्तस्वभावस्याप्येष नररूपधरो रामकृष्ण इव प्रकटितलीलानन्दसन्दोहधोरणीधरभवलेखः, तस्मात् तथाविधनामकरणे न दोषः। यद्वा, स्वामिकृतापररामकृष्णस्तोत्रेभ्यो व्यावर्तनात्। ननु **हृदयकमले**त्यादिना अभेदानन्दस्वामिपादैः कृतं खलु रामकृष्णावतारवर्णनम् इति चेत् कृतेऽपि तत्र सकलमहापुरुषाकलनात्मकत्वात् तस्य सामान्यव्यपदेशः। अत्र किल **यो रामः, यो कृष्णः, स एवेह रामकृष्ण** इति भगवन्मुखप्रसूतविशेषसूचनायां तद्ध्वनिभूतैतत्स्तोत्रकुसुमसुरभिवितरणे सर्वथास्ति नूनं विशेषावगाहिता। किञ्च, वाक्यमेतद् भगवन्मुखात् स्वामिपादैः साक्षाच्छ्रुतमिति परमविशेषत्वमस्ति नूनम्। ननु स्वामिहृदयस्थः कविर्वा भक्तो वा एतत्पद्यद्वये कर्ता? कविरेव। कुतः? न तु सामान्यः कविः, अपि तु क्रान्तदर्शी एव, ऋषित्वात्। अन्यथा सामान्यजनानां वृत्तान्तश्रवणजप्रेरणाशक्तिसहकृतस्वप्रतिभानुगुणकाव्यबन्धेभ्य एतयोः न भवेद् विशेषता। एतत्पक्षे स्वामिपादस्य विशेषराहित्यम्। न तद् वाच्यम्। यो हि भगवान् सर्वशक्तिमान् अपि स्वकर्मप्रवर्तकत्वेन स स्वयं लेखनीधरः तस्य स्वशिष्यस्य जगदाचार्यत्वं प्रतिपादयामास लोकशिक्षाकर्मणि प्रेरयामास


*dīpaśikhā*/v1/2023/Abirlal Gangopadhyay/pp. 9-15

च। तथाधिकारिणि महापुरुषे न क्वचित् सामान्यबुद्धिकल्पना। तेन शिवकल्पस्य तस्य अलोकसामान्यप्रेरणाफलात्मके हि इमे काव्ये। भक्तपक्षेऽपि न सामान्यः **यथा व्रजगोपिकानाम्** इति नारदसूत्रेण तस्य परभक्तिमत्त्वं ज्ञेयम्। तल्लक्षणं चाह **सा तस्मिन् परमप्रेमरूपा** इति **अमृतस्वरूपा च** इति च। भक्तिमतश्च स्वरूपमाह **यल्लब्ध्वा पुमान् सिद्धो भवत्यमृतो भवति तृप्तो भवति** इति। **रसो वै सः रसं ह्येवायं लब्ध्वानन्दीभवति** इति च श्रुतिः। एतेन परतृप्तान्तःकरणस्य तस्य ऋषित्वमेव फलति। किन्तु भक्ते सत्यपि वाग्बन्धात्मकरसात्मककाव्यस्फूर्तिः स्यादिति नान्वयः। तेनास्मिन् तु कविपक्षो बलीयान्। अत्र मन्दाक्रान्तावृत्तम्। **मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेद्** इति तल्लक्षणं भट्टकेदारस्य। न खलु **यस्य प्रेम** इत्यत्र **स्य** इत्यस्य लघुसद्भावेऽपि गुरुत्वापत्तौ छन्दोभङ्ग इति वाच्यम्। तस्य लघुतैव। तस्मात् **प्रशब्दे ह्रशब्दे च परतः अपादान्तस्थस्यापि लघुतायाः कवियोगे दर्शनात्। तथा च कुमारसम्भवे गृहीतप्रत्युद्गमनीयवस्त्रा इति प्रशब्दे परतस्तस्य लघुता दृष्टा** इति वृत्तरत्नाकरटीकायां नारायणभट्टः। अपि च अतितीव्रप्रयत्नसद्भावे संयोगमात्रस्यैव परभूतस्य गुरुत्वापत्तौ लघुता स्याद् इति भोजादयः। तथाहि सरस्वतीकण्ठाभरणे **यदा तीव्रप्रयत्नेन संयोगादेरगौरवम्। न च्छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः** इति। एवमत्र आदिकवेः प्राचेतसस्य काव्यमुद्धरति भट्टनारायणः **कृतार्थाश्च** इत्यादि। एवं तत्रापि ऋषित्वे स्वामिप्रयोगे कर्तृसत्त्वसाम्यं स्फुटति। तथाहि भावघनवाणी श्रूयते स्वामिनः **आदिकविरहम्** इति सख्ये इति नाम्नि वङ्गकाव्ये। इह तु प्रथमः पक्षः पर्याप्तः। इदं काव्यद्वयं परम्परायाम् आनद्धायोगेन तिलंगरागेण च गीयते। तिलंगरागाभास इति केचित्। तस्य स्वरूपम्– स-ग-म-प-नि इति आरोहे, कोमलनि-प-म-ग-स इति चावरोहे। औडवजातिमान्।

**प्रथमस्य व्याख्या** अथ स्वल्पव्याख्याऽऽरभ्यते। अत्र यः रामः, यश्च कृष्णः, सः अयं रामकृष्णः इति यत्तदोः सम्बन्धः। तेन द्वयोः श्लोकयोः एकत्वेनालोचना कर्तव्या। अन्यथा एकवाक्यताहानिः। तथाहि आद्ये श्लोके रामावतारः प्रस्तूयते **आचण्डाले**ति।

आचण्डालाप्रतिहतरयो यस्य प्रेमप्रवाहो
लोकातीतोऽप्यहह न जहौ लोककल्याणमार्गम्।
त्रैलोक्येऽप्यप्रतिममहिमा जानकीप्राणबन्धो
भक्त्या ज्ञानं वृतवरवपुः सीतया यो हि रामः॥१॥

**यस्य** प्रसिद्धस्य मर्यादापुरुषोत्तमस्य रघुवरस्य **प्रेमप्रवाहः** स्नेहप्रवृत्तिः सौहार्दव्यवहारः इति यावत्। स स्नेहस्य व्यवहारः कियान् आवर्जनशीलः इति उच्यते विशेषणेन **आचण्डालाप्रतिहतरयः** इति। श्वपाकपर्यन्तः अबाधितः वेगः यस्य स्नेहव्यवहारस्य तादृशः स्नेहमयव्यवहारः चण्डालादीन् संसारस्थातिनिम्नसंस्कारशालिनोऽपि आवृणोति इत्याशयः। तेन समस्तसंसाराक्रान्तस्तस्य प्रेमव्यवहारः इति फलति। न कश्चित् कीटोऽपि तद्व्यवहाराविषयीभूत इति ध्वन्यते। स तादृशः स्वभावः सामान्ये लोकस्थे पुरुषे न सम्भवतीति **लोकातीतः**। रमन्ते योगिनः इति रामशब्दस्वारस्ये निर्विशेषपरमात्मनो लोकातीतत्वं निश्चप्रचं युज्यते। किन्तु लोकातीते सति तस्य व्यवहारो न स्याद् **अव्यवहार्यम्** इति श्रुतिनिर्देशात्। तस्माद् **अपि**शब्दः। तेन लोकातीतः विषयविषयिसम्बन्धयुतलोकविरहितो निर्विशेषोऽपि स भगवान् संसारावर्तपतितशोकार्तजनकल्याणेच्छुः **न जहौ** न तत्याज **लोककल्याणमार्गं** जीवानां निःश्रेयससाधनपन्थानं सकलजीवचरमार्थसिद्ध्यन्वेषणमिति वा। **अहह** इति विस्मये। कुतः? उच्यते। स्वयं रागद्वेषद्वन्द्वातीतोऽपि करुणामात्रसत्त्वः सन् एव द्वन्द्वावर्जितजीवोद्धाररूपकल्याणकर्ता स्यात्। नोचेद् **अन्धेनैव नीयमाना यथान्धा** इति स्थितिः। किन्तु लोके सोऽपि भगवान् देहधर इव सीतावियोगादिजन्यदुःखभाक् सन् अपि लोककल्याणाद् न विरत इति

महान् विस्मय एव। तेन अद्भुतोऽत्र रसः। यद्वा, **तत्सृष्ट्वा तदेवानुप्राविशत्** इत्यादिश्रुतेः जगदुपादानाद् जीवानां मूलस्वभावः स एव सकलहृदयपुण्डरीके अङ्गुष्ठमात्रपुरुषः सकलजीवेभ्यः तत्स्वरूपज्ञाने प्रचोदनकर्ता सृष्ट्वापि जगद् जगद्दुःखनिरसनतत्पर इति मनुष्यबुद्धिविषयातीतः अचिन्त्यकार्यमयः कथं तथाकार्यकारीति विस्मय एव सर्वदा तस्य कार्यावलोकने जायते धीराणामपि चेतसि। ननु लोकातीतः कथङ्कारेण लोकसामान्यतया प्रतिभात इत्युच्यते **जानकीप्राणबन्ध** इति। जानक्याः स्वजायायाः स्वमायायाः इति यावत्। तस्याः प्राणः सत्त्वम् एव बन्धः यस्य तथाभूतः रामचन्द्रः। निर्विशेषस्य तस्य असहकृतमायस्य न व्यवहारः। तेनैव लोककल्याणाय स्वां मायाम् आश्रयीकृत्य रामभद्रः देहवान् इव रराजे। तस्माद् एव **त्रैलोक्ये** समस्ते प्रपञ्चे **अपि** तस्य **अप्रतिममहिमा** अतुल्यैश्वर्यविशेषः असदृशमहद्भावो वा विस्तृतः। एवमत्र शक्तेरादरः कृतः। उक्तं च स्वामिनाऽन्यत्र स्वकीये सख्ये इति काव्ये **सशक्तिकं नौमि ते पदम्** इति। तथाहि लोककल्याणेच्छुरपि भगवान् स्वमायां विना अनुपहितस्वभावः क्वचित् तत्कार्ये प्रवृत्तो न स्यात्। तां विना हि लोककल्याणेऽपि सम्भावनाराहित्यम्। तत्सम्भावनाराहित्ये च समस्तप्रपञ्चव्यापि तस्य भगवतो माहात्म्यमपि न प्रथितं स्याद् इति शक्तेरेव सर्वत्र सहायकत्वं सूचितम्। तेन सशक्तिकः स रामः स्मर्यते इति नूनं युक्तम्। एवंविधः करुणावरुणालयो यो रामचन्द्रः सीतया **वृतवरवपुः** स्वीकृतपरकायः, भगवतः अवतारग्रहणे तस्य कायस्यापि अतुल्यमाहात्म्यं गम्यते। अहो श्रूयते हि रामकृष्णभगवत्पादरोदनं स्वमातृशवपदपरिग्रहपूर्वकं **मातर्न ज्ञायते त्वया कं धृतवती स्वगर्भे** इति। पुनस्तत्र अध्यात्मतत्त्वं प्रकटीक्रियते **भक्त्या ज्ञानम्** इति। भक्तिसहकृतज्ञानस्य घनीभवत्वं सीतासहकृतरामचन्द्रस्य अवतरणम् इति विवक्षा। तत्र भक्त्या वैदेही परामृष्टा। ज्ञानेन च रामभद्रः। हिशब्दः निश्चयार्थः। रूपकालङ्कारः। तेन साक्षाद् भक्तिः मूर्तिमती जगज्जननी सीता। विमूर्तस्य च ज्ञानस्यैव मूर्ती रामभद्रः। उक्तं हि भगवता रामकृष्णेन– **स साकारः, स निराकारः। कीदृशः? मन्यतां सच्चिदानन्दसमुद्रः। सति भक्तिहिमे तस्य समुद्रस्य केषुचित् स्थानेषु सलिलं हिमीभवति। यथा जलं हिमाकारवत् सत् घनीभूतम्। अस्यार्थः, स भक्तस्य समीपं साक्षाद्भूतात्मा क्वचिद् वा साकाररूपः सन् प्रत्यक्षीभवति** इति। अपि च तेनैव **भक्तिस्वीकारो लोकशिक्षायै, यथा अवतारादयः** इति। किञ्च, **भक्तिः चन्द्रः, ज्ञानं सूर्यः** इति भगवद्वाक्यम्। यथा सूर्यः लोकचक्षुषि दुःखदर्शनः, किन्तु तस्यैव भासा भासितः चन्द्रः सुखदर्शनः, तथैव ज्ञानस्वरूपोऽपि परमात्मा भक्त्या सीतया स्वमायया घनीभूतः। तथाभूत एव लोककल्याणकृदादिस्वरूपकः॥१॥

**द्वितीयस्य व्याख्या** एवमाद्यश्लोकेन रामावतारसत्त्वप्रकाशनात् परं प्रकृतपरामृष्टः कृष्णावतारसारः प्रकटितः **स्तब्धीकृत्ये**त्यादिना।

स्तब्धीकृत्य प्रलयकलितं बाहवोत्थं महान्तं
हित्वा रात्रिं प्रकृतिसहजाम् अन्धतामिस्रमिश्राम्।
गीतं शान्तं मधुरमपि यः सिंहनादं जगर्ज
सोऽयं जातः प्रथितपुरुषो रामकृष्णस्त्विदानीम्॥२॥

**बाहवात्** दुःशासनदुर्योधनकर्णजयद्रथभीमार्जुनशकुनिप्रमुखमहावीरबाहुतः। सामान्याद् एकवचनम्। बाहवशब्दस्य बाहुशब्दपर्यायत्वं यद्यपि श्रुतिप्रसिद्धं तथाप्यस्मिन् आर्षे प्रयोगसामर्थ्यं गम्यते। अत्र बाहवशब्दः लाक्षणिकः। कुरुक्षेत्ररणस्थलस्यैव लक्ष्यार्थत्वम्। प्रयोजनवतीह लक्षणा। संयति भुजस्यैव मुख्यत्वम्। एवं महावीरसंस्पर्शाद् महाभयङ्कररूपं तद् रणस्थलमिति ध्वन्यते। यद्वा, बाहः बाहुः भुजः **पृषोदरादित्वात्साधुरि**ति कल्पद्रुमः। वाहस्यापि क्वचिद् दर्शने तस्य बाहुरूपार्थे

सत्यपि बाहस्य आद्यार्थे बाहुसद्भावे तस्य ग्रहणमेव वरं, वाहविषये तु न प्राथमिकार्थता। वाति हन्तीति वः हन्ता हननकर्ता। बाहेन वः भुजदण्डकरणकहननक्रियाशाली दोर्दण्डप्रतापवान् इति बाहवः, ते बाहवाः महाभुजाः महाशूराः भीष्मद्रोणकृपयुधिष्ठिरदुर्योधनभीमार्जुनकर्णादयः। ते यत्र सन्ति तत् स्थलं **बाहवं** कुरुक्षेत्रं स्वनामधन्यधर्मक्षेत्रं रणस्थलीभूतम्। तस्माद् **उत्थं** समुद्गतं स्फुरितं महान्तं विशालस्वरूपं **प्रलयकलितं** प्रलयः नाशः तं कलितं विदितं प्राप्तं धृतं वेति। एतेन सामूहिकनाशसम्भावना तादृशप्रलयङ्करे रणे द्योतिता। तादृशं प्रमुखमहावीरास्फोटबहुभयङ्करं संख्यं नाशमुखस्थं **स्तब्धीकृत्य** क्षणाय अचलीकृत्य अन्धतामिस्रमिश्राम् अन्धकारस्वरूपम् अज्ञानघनं तामिस्रः तमिस्रं तमः तद् अस्मिन् अस्तीति कुरुपाण्डवयुद्धकारणीभूतः भोगेच्छावरोधी क्रोधः, तेन मिश्रां युक्ताम्। यद्वा, विषादयोगस्थम् आर्जुनवाक्यमेव अन्धम् अज्ञानरूपम्। तद् एव तामिस्रं तमोमयनरकम्, **अनार्यजुष्टमस्वर्ग्यम्** इत्यादिभगवद्वाक्यात्। तेन युक्ताम्। **स याति नरकं घोरं तामिस्रं नाम नामतः** इति भविष्यपुराणे। अथवा अन्धतामिस्रम् इति अज्ञानपर्यायः इति कल्पद्रुमः। तेन अज्ञानेन युक्ताम्। सैव विशिष्यते **प्रकृतिसहजामि**ति। प्रकृतिः अविद्या तत्र सहजा स्वभावजाता अनिर्वचनीयत्वाद् अनादिस्वभावा, ताम्। पुनः कीदृशी? रात्रिः। सा अज्ञानस्वरूपा अविद्यासहजाता रात्रिः अन्धकारमयस्वरूपा निरङ्कुशतया प्रकाशलेशरहिता। प्राणिनां ज्ञानबाधिका। संसारमहागर्तप्रवेशयित्री। तदुक्तं भगवता–

**कुतस्त्वा कश्मलमिदम्** इत्यादि। तां **हित्वा** त्यक्त्वा छित्त्वा विनश्य इति यावत्। **गीतं** भाषितम् उपदिष्टम् इति यावद् **अशोच्यान्** इत्याद्यारभ्य **सर्वधर्मान् परित्यज्य** इत्यादिपर्यन्तम्। येनेति पदाध्याहारः। कथं गीतम्? **शान्तम्** इति तद्विशेषणम्। योगाधिष्ठितस्य तस्य भगवतः शमात्मकवाक्यपरम्परावशाद् गीतस्य तस्य शान्तस्वरूपता। एतद् अशान्तस्य पार्थस्य सद्भावे सर्वतो युज्यते। किञ्च, पुनः किंस्वरूपं गीतमित्युच्यते **मधुरम्** इति। **अपि**शब्दः विशेषख्यापनार्थम्। शान्तमपि उपनिषदादिकं न सामान्येभ्यः मधुरात्मना भाति। किन्तु गीतारूपवाणी सुधा आपामरमपि द्रवीकरोति। अयि भोः किमुच्यते अर्जुनस्य साधारणत्वमिति चेद् नूनं वक्तव्यम्। विषादकवलिताज्ञानान्धकारमज्जितस्य तस्य तस्मिन् काले हीनत्वमेव प्रतिपन्नं **क्लैब्यं मा स्म गम** इत्यादिभगवद्वाक्यात्। तस्मात् शान्तमधुरगीतकर्ताऽपि स भगवान् **सिंहनादं जगर्ज**। सिंहो हि अधिराजः पशूनां मृगेन्द्र इति नाम। गर्जने तस्य महापराक्रमो द्योत्यते। तथैव गीतारूपशब्दमयशास्त्रं सर्वोपनिषत्सारभूतं सकलशास्त्रमूर्धाभिषिक्तम् इति ध्वन्यते। अपि च स्तब्धीकरणतमोनाशनपुरःसरेण गर्जनेन तस्य अज्ञानपशुभयोत्पादानमारणतत्परताऽपि सूचिता। **नष्टो मोह** इत्यादिपार्थवाक्ये खलु तत्फलद्योतना। यद्वा, सिंहनादशब्देन गीतारूपाध्यात्मतत्त्वस्य हीनपुरुषविषयतानिराकरणं वक्तव्यम् **आशिष्ठो द्रढिष्ठो बलिष्ठः** इत्यादिश्रुतेः। एवं **यः** वासुदेवाख्यो भगवान् स्वयं गीतातत्त्वम् आदिदेश, **सः अयं प्रथितपुरुषः** वेदादिमूर्धन्यशास्त्रकीर्तितचरितः इदानीम् अस्मिन् वर्तमाने ऊनविंशतितमेशवीयाब्दरूपकालभागे **रामकृष्णः** एतन्नामोपाधिकः जातः। एवं द्वितीयश्लोकान्तिमपादे यत्तत्सम्बन्धशान्तिरत्र। अयमिति इदमः नैकट्यार्थः। यः किल कालावच्छेदेन श्रुतः रामः कृष्णो वा, स एव अयं मम दीनबन्धुर्गुरुः भगवान् स्वयं रामकृष्णनाम्ना प्रथितोऽस्ति। किञ्च, यत्तदादिविशेषणानां प्रसिद्धवस्तुनिर्देशत्वाद् यो निर्विशेषः परमात्मा स्वमायां वशीकृत्य राम इव कृष्ण इव विशिष्टयुगयोः समवतीर्णः, स एवास्मिन् कलौ रामकृष्ण इव जात इव सारदाख्यसशक्तिकः अव्यवहार्योऽपि भक्तिज्ञानमयकलेवरः कथामृतादिमुखेन लोकानुग्रहकारको विराजत इव। यद्वा, सोऽयम् इति प्रत्यभिज्ञया रामकृष्णावतारस्वरूपप्रकाश एव जातः। ननु सोऽयं देवदत्त इति देवदत्तः पूर्वं दृष्टः सशब्दपरामृष्टः, एतत्कालदृष्टदेवदत्तस्तु अयंशब्दपरामृष्टः। किन्तु अदृष्टे तस्मिन् रामादौ कथमत्र प्रत्यभिज्ञासिद्धिरिति चेद् बाढम्। अत्र

सपरामर्शः परोक्षाभिहितौ रामकृष्णौ इति वक्तुं न शक्यते व्यक्तिद्वयसत्त्वात्। यत्तत्परामर्शस्तु निर्विशेषे परमात्मनि प्रसिद्धात्। देहधारणादिकं तु विशेषावगाहि **अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्** इति भागवतवाक्यात्। तेन अयम्परामर्शः फलति। निर्विशेषतत्त्वास्वीकारे सर्वथार्थहानिरेव। अपि च एतेन प्रत्यभिज्ञामुखेन भगवतो रामकृष्णस्योपदेशमुख्यभागोऽपि सुव्यक्तः। उक्तं हि तेन– **विषयद्वये ज्ञानमेव तेषामलम्। प्रथमतः, अहं कः; ततश्च ते च के इति मया सह कः सम्बन्धस्तेषाम्** इति। एवं हि रामकृष्णसारसंग्रहणात्मकरामकृष्णावतारमाहात्म्यं स्पष्टीभवति। तत्र लोकानुग्रहस्तस्य भगवतो दक्षिणेश्वरस्य विशेषगृहच्छदि स्थितस्य तद्भक्ताह्वानव्याकुलतादिषु प्रसिद्धः। किमधिकमिति तस्य भगवतः सर्वभूतमहेश्वरस्य समग्रैश्वर्यवीर्ययशःश्रीज्ञानवैराग्यसम्पन्नत्वादपि वैराग्यमात्रयशस्विरूपेण प्रच्छन्नतया प्रकटितलीलस्य तत्रैव सकलकल्याणनिहितत्वात् तन्मुख्योपदेशे सततनिष्ठस्य एवम् अवतारमर्मप्रकटनपरकाव्यं रागद्वेषद्वन्द्वविरहितजीवहृदयानन्दप्रकाशपरं परमानन्दप्रकटनपर्यवसितं विजयतेतमाम्॥२॥

**गीतिकाव्यस्य उपोद्घातः** अथ मधुरललितविलम्बितलयान्वितगीते गीते सति स्वामिना भावगद्गदध्वनिना महाभावुकः सन् मुहुर्मुहुः स्वनाथं सम्बोधयन् महासत्त्वोत्थभावयितृप्रतिभाप्रकाशकं काव्यं जगौ **नरदेवे**त्यादि। अस्य **नरदेवे**त्यादेः आचण्डालस्तोत्रेऽन्तर्भावपक्षे संशये सत्यपि परम्परायां सहावस्थितप्रयोगदर्शनात् सहैव आचण्डालेनाचक्ष्यते। अस्या गीतकाव्यत्वं सम्प्रदायविज्ञेयम्। तत्र **शक्तिसमुद्रे**ति **अद्वयतत्त्वे**ति द्वौ दोधकवृत्तबद्धौ। **दोधकवृत्तमिदं भभभाद् गौ** इति भट्टकेदारः। **नरदेव देव जय जय नरदेव** इति सम्बोधनपदान्वितवाक्यखण्डं तु ध्रुवपदं गीतारम्भे गीतमध्ये गीतान्त्ये च प्रतिवारं त्रिवारं गेयम्। स्तोभवाक्यवद् अनेन भावघनीभावो ध्वन्यते। गीतमेतद् मालकौशरागेण गीयते। तत्स्वरूपं स-कोमलग-म-कोमलध-कोमलनि इति आरोहे व्युत्क्रमेणावरोहे च। अयम् औडवजातिमान्। अस्य सर्वे कोमलस्वरा एव तत्सामान्यश्रुतेः एकश्रुत्या अपकृष्टाः भवन्ति। उतरा इति तथाभूतानां लोके नाम। तेन द्विश्रुतिककोमलस्य गान्धारस्य एकश्रुतित्वम्। तथैव कोमलधैवतस्य कोमलनिषादस्य च। अस्य वीररसे विनियोग इति सङ्गीतमहोदधौ। तीनतालः तालः षोडशमात्रकः। पखावाजानद्धस्य प्रयोगे औचित्यं वीररसपोषकत्वात्।

**नरदेवे**त्यादि नराणां देवः हृदयान्तर्यामी द्योतनशीलः नरेषु नराणां मध्ये हृदयस्थाने ईश्वरः सर्वभूतानामित्यादिस्मृतेः। परमात्मा प्रकाशते इति च द्योतनशीलत्वं श्रुतिप्रसिद्धम्। अन्यत् स्पष्टार्थम्। स नरदेवः भगवान् गुरुः कविसम्बन्धी, अपि च स गुरूणामपि गुरुः इत्याप्तप्रामाण्याद् जगद्गुरुपदवीमारूढन् पाठकप्रसङ्गेऽपि युक्तः। तादृशस्य विलक्षणगुरोर्हृदयं प्रकाशयन् आदावाह **शक्तिसमुद्रे**त्यादि।

(मालकौशरागेण तीनतालेन गीयते)

नरदेव देव जय जय नरदेव॥
शक्तिसमुद्रसमुत्थतरङ्गं दर्शितप्रेमविजृम्भितरङ्गम्।
संशयराक्षसनाशमहास्त्रं यामि गुरुं शरणं भववैद्यम्॥३॥
नरदेव देव जय जय नरदेव॥

**गीतिकाव्यस्य प्रथमस्य व्याख्या** **शक्तेः समुद्रः** पारावारः। असीमितशक्तिः इति तात्पर्यम्। शक्तिशक्तिमतोरनन्यत्वाद् इति सिद्धान्तबलात् सकलशक्तिमत्त्वं भगवति एव युक्तम्। तेनैव अकल्प्यशक्तिसिद्धिः। तत्र **समुत्थः तरङ्गः** यः तादृशः। **प्रेम्णा विजृम्भितं रङ्गं दर्शितं** येन तं **दर्शितप्रेमविजृम्भितरङ्गम्**। कान् दर्शयामास इत्युक्ते मर्त्यान् भक्तान्। आचण्डालप्रेमप्रवाहतात्पर्यम्

अत्रापि अन्वेष्टव्यम्। रङ्गस्य भवलीलेति तात्पर्यम्। तस्य नित्यस्य लीला। लीलायां च नित्यः स भगवान् रामकृष्णरूपेण प्रेम्णा प्रकाशिता तस्य भवलीला। तस्माद्धि दृश्यन्ते बहुधा तस्य महाभावाकुलितचरितचित्राणि। पारिषदैर्भक्तैरपि तत्प्रेमसमप्रेमाभावप्रस्तावनाद् इति कथामृतलीलाप्रसङ्गादिकमत्र प्रमाणम्। किञ्च स्वामिनः सख्ये इति वङ्गीयकाव्यमपि। पुनश्च भगवान् श्रीरामकृष्णः साक्षात् **संशयराक्षसनाशमहास्त्रः**। अतिप्राकृतस्य गुरुवाक्यशास्त्रविश्वासहीनस्य च संशयात्मत्वमिति सम्प्रदायः। तत्तु बहुकालाद् अदृष्टशास्त्रोक्तमहापुरुषवैभववशाद् भवति। संशयस्तु मोहांशवशीभावाद् रजोगुणबहुलाद् राक्षसप्रकृतिं जनयति व्यष्टौ समष्टौ च क्रमशः इत्यत्र चरकादीनां मानसप्रकृतिसिद्धान्तो द्रष्टव्यः। तस्मात् संशयरूपस्य राक्षसस्य नाशे महास्त्रं यः तम् इति तात्पर्यम्। संशयराक्षसस्य महान् घातकः नाशकः अरिः। कथमिति सकलकल्याणगुणसम्पन्नो हि भगवदवतारः। दृष्टे तेन कृते अकल्याणेऽपि तदवगुण्ठितं तु कल्याणमेव भवतीति राद्धान्तः। कल्याणसद्भावाद् एव गुरुशक्तेः प्रस्रवणः। प्रसादशक्तिस्तत एव निःसरति। दक्षिणस्य कल्याणार्थकत्वात्। पुनः दक्षिणामूर्तेर्गुरुभावत्वात्। **रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमि**ति हि श्रुतिः। अपि च तत्रभगवता पतञ्जलिनाप्युक्तं **स पूर्वेषामपि गुरु**रिति। तेन जगद्गुरुपदवीभाजस्तस्यैव संशयमूलोत्पाटिनी शक्तिः। अपि च स्वजीवनेन बहुविधशास्त्रोक्तस्य गूढविषयस्य अकल्प्यविषयस्य च समाध्यादिविविधसाधनभूतविषयादीनां प्रदर्शनाद् अपि एतद्विशेषणं युक्तम्। एवं मास्टारमहोदयं प्रति यत् स्वाकारं वारं वारं प्रदर्शयन् एकदोक्तवान् आसीत् – एनं चिन्तय सर्वं भविष्यतीति तस्य गुरुपदवीं जगद्गुरुपदवीं दक्षिणामूर्तिपदवीमिति यावद् द्रढयति नूनम्। एतादृशे साक्षाद् अवतरितगुरुभावे भगवति एव गुरुशब्दप्रयोगः सर्वथा अन्वर्थको भवति। तस्माद् एवं जगदीश्वरं स्वामिगुरुं जगद्गुरुं **भववैद्यं** संसाररोगनाशकं भिषग्वरं **शरणं यामि** गच्छामि ॥३ ॥

नरदेव देव जय जय नरदेव ॥
अद्वयतत्त्वसमाहितचित्तं प्रोज्ज्वलभक्तिपटावृतवृत्तम्।
कर्मकलेवरमद्भुतचेष्टं यामि गुरुं शरणं भववैद्यम् ॥४ ॥
नरदेव देव जय जय नरदेव ॥

**गीतिकाव्यस्य द्वितीयस्य व्याख्या** **अद्वयतत्त्वे**त्यादि। **अद्वयतत्त्वे** सकलोपाधिविरहिते निर्विशेषे परमात्मनि स्वस्वरूपे तुरीये **समाहितं चित्तं** यस्य तम्। प्रसिद्धा किल मुहुर्मुहुर्भगवतो रामकृष्णस्य समाधिमग्नता। न तु कठोरनीरससमाहितोऽयं पुरुषः। अपि च भक्तिरसप्रपूरित इति वक्तुं **प्रोज्ज्वले**त्युक्तम्। **प्रोज्ज्वलो** विशदः शुभ्रो निर्मलः पवित्र इति यावत्। पटस्य विशेषणम्। भक्तिरेव पटः **भक्तिपटः**। रूपकम्। तेन **आवृतं** विमण्डितं **वृत्तं** चरित्रं यस्य तम्। भक्त्याकुलितचरित्रोऽपि समाधिगम्भीरः इति महाशयत्वं व्यज्यते। यद्वा **अद्वयेत्यादिना** ज्ञानयोगः **प्रोज्ज्वले**त्यादिना भक्तियोगः **कर्मकलेवरे**त्यादिना कर्मयोगो द्योत्यते। राजयोगस्य तु अद्वयेत्यादौ अन्तर्भावः, यतो हि तन्त्रसाधनाया अन्त्ये अद्वैतसाधनान्त्ये च समानानुभूतिरिति भगवद्वचनप्रामाण्यात्। अपि च राजयोगहृदयरूपं कुण्डलिनीशक्त्याद्युत्थानं तन्त्रसाधनाङ्गरूपम्। यद्वा यावन्न जागरिता कुण्डलिनी तावन्न चैतन्योदय इति भगवद्वचनाद् राजयोगस्य **अद्वये**त्यादिकथनेनान्तर्भाव इति गम्यते। कर्म एव कलेवरं यस्य तम्। लोककल्याणचिकीर्षुत्वाद् भगवतः अवासनावशगस्यापि देहस्वीकाराद् वासनापूरणाद्यधमकर्मप्राप्तिर्नास्ति। किन्तु निष्कारणलोककल्याणकारी सन् यः कर्मित्वं तस्मिन् स्वेनैव साधितं तद्वशात् कर्ममयत्वं तस्य कलेवरस्य। तेन कर्मण एव मूर्तिमदिदं भगवतः कलेवरम्।

तस्यैव यथार्थकर्मकारित्वं शक्यं कर्मण्यकर्मेत्यादिस्मृतेः। अद्भुता चेष्टा यस्य सः अद्भुतचेष्टः तम्। सकलकल्याणकारित्वे सति अवतारे अद्भुतः किल भवति प्रयत्नः जीवकल्याणाय। तस्माद् वचनं न मे भक्तः प्रणश्यतीत्यादिकम्। एवं भगवन्तम् आदिगुरुं स्वामिगुरुम् अज्ञानान्धकारध्वंसकं भववैद्यं शरणं यामीति पूर्ववत्॥४॥

इत्येवं प्रकटीकुर्वे स्वामिसत्त्वार्थमद्भुतम्।
अनया प्रीयतां स्वामी सखा जन्मनि जन्मनि॥
करुणाहिमघनीभूतब्रह्मणो नोऽस्तु सर्वदा।
सदाप्रवर्तमानायां कृपायां बुद्धिदा कृपा॥



# हिन्दुधर्मः श्रीरामकृष्णश्च

विवेकानन्दस्वामिभी रचितोऽयं लघुलेखः वङ्गभाषामूलः
श्रीश्रीरामकृष्णलीलाप्रसङ्गस्य तृतीयखण्डस्य प्रारम्भे संयोजितो विराजते।

## स्वामिना वेदार्थानन्देन अनूदितः [1]

आचण्डालाप्रतिहतरयो यस्य [2] प्रेमप्रवाहो
लोकातीतोऽप्यहह न जहौ लोककल्याणमार्गम्।
त्रैलोक्येऽप्यप्रतिममहिमा जानकीप्राणबन्धो
भक्त्या ज्ञानं धृतवरवपुः सीतया यो हि रामः॥

स्तब्धीकृत्य प्रलयकलितं वाहवोत्थम् महान्तं
हित्वा रात्रिं प्रकृतिसहजामन्धतामिस्रमिश्राम्।
गीतं शान्तं मधुरमपि यः सिंहनादं जगर्ज
सोऽयं जातः प्रथितपुरुषो रामकृष्णस्त्विदानीम्॥

शास्त्रमिति शब्देन अनादिरनन्तो वेदो बुद्ध्यते । धर्मशासनाय अयं वेद एव क्षमः।

पुराणादयः अन्ये ग्रन्थाः स्मृतिशब्दवाच्याः। यावत्ते श्रुत्यनुसारिणः तावदेव तेषाम् प्रामाण्यम्।

सत्यं द्विप्रकारकम्– (१) मानवसाधारणपञ्चेन्द्रियग्राह्यं तदुपस्थापितेन अनुमानेन गृहीतञ्च,
(२) अतीन्द्रियसूक्ष्मयोगजशक्तिग्राह्यञ्चेति।

प्रथमोपायेन सङ्कलितं ज्ञानं विज्ञानमुच्यते। द्वितीयप्रकारकं सङ्कलितं ज्ञानञ्च वेदः।

वेदाख्यः अनादिरनन्तोऽलौकिको ज्ञानराशिः सदा विद्यते। सृष्टिकर्ता स्वयं तस्य साहाय्येन अस्य जगतः सृष्टिस्थितिप्रलयं करोति।

सा अतीन्द्रियशक्तिः यस्मिन् पुरुषे आविर्भवति तस्य ऋषिरिति नाम। तया शक्त्या च स यदलौकिकं सत्यमुपलभते तस्य वेद इति नाम।

एतस्य ऋषित्वस्य वेदद्रष्टृत्वस्य च प्राप्तिरेव यथार्था धर्मानुभूतिः। साधकस्य जीवने यावदस्य उत्पत्तिर्न भवति तावद् धर्मस्तु केवलं 'वाग्वैखरी'। धर्मराज्यस्य प्रथमे सोपानेऽपि तस्य पुरुषस्य पादन्यासो न जात इति वेद्यम्।

समस्तदेशकालपात्रव्यापि भवति वेदस्य शासनम्। वेदस्य प्रभावो देशविशेषे कालविशेषे पात्रविशेषे वा न आबद्ध इत्यर्थः।

विश्वजनीनस्य धर्मस्य व्याख्याता केवलं वेद एव।

किञ्चित्परिमाणकम् अलौकिकज्ञानवेत्तृत्वम् अस्मद्देशीयेषु इतिहासपुराणादिग्रन्थेषु म्लेच्छादिदेशीयेषु धर्मग्रन्थेषु च यद्यपि वर्तते, तथापि अलौकिकज्ञानराशेः सर्वप्रथमस्य सम्पूर्णस्य अविकृतस्य च सङ्ग्रहस्य रूपेण आर्यजातौ प्रसिद्धो वेदाख्यः चतुर्धा विभक्तोऽक्षरराशिः सर्वतोभावेन सर्वोच्चस्थानस्य अधिकारी, समग्रे जगति पूजार्हः, किञ्च आर्याणां वा म्लेच्छानां वा सर्वेषामपि

---

[1] व्याकरणशुद्धिं विवक्षितार्थसिद्धिञ्च समं विचिन्त्य मन्त्रसमानान् मूलशब्दानेव यथासम्भवं समाकलय्य अयमनुवादः कृतः।

[2] 'स्य' इत्यस्य गुरुत्वं भवति, एतदनन्तरं युक्ताक्षरस्य सत्त्वात्। एवमत्र छन्दोभङ्गो लक्ष्यते। "यत्र स्वयं भाति ह्ययं परात्मा" (विवेकचूडामणिः ९९) इत्यस्मिन् वंशस्थमिश्रितोपजात्या रचितस्य श्लोकस्य पादे छन्दोभङ्गनिवृत्त्यै यः समाधिः स्फुरेत् पण्डितानां स एवात्रापि भवतु।


*dīpaśikhā*/v1/2023/Swami Vedarthananda/pp. 16-18

धर्मग्रन्थानां प्रमाणभूमिः।

आर्यजात्या आविष्कृतस्य पूर्वोक्तस्य वेदाख्यशब्दराशेः विषये इदमपि बोध्यं यत् तन्मध्ये लौकिकम् अर्थवादरूपम् ऐतिह्यं वा यन्न स्यात् तदेव वेद इति।

वेदराशिरयं ज्ञानकर्मकाण्डाभ्यां द्वेधा विभक्तः । कर्मकाण्डस्य क्रियाः फलानि च मायाधिकृते जगति सर्वदा अवस्थितानीति हेतोः देशकालपात्रादिनियमानुसारं तेषां परिवर्तनम् अभवत्, भवति, भविष्यति च। सामाजिक्यो रीतिनीतयोऽपि एनं कर्मकाण्डमाश्रित्य स्थिताः इत्यतः काले काले परिवर्तिताः भवन्ति, भविष्यन्ति च। लोकाचाराश्च सर्वे सच्छास्त्रेण सदाचारेण च अविसंवादिन एव सन्तः काले काले परिगृहीताः भवन्ति, भविष्यन्ति च। सच्छास्त्रविगर्हितस्य सदाचारविरोधिनश्च केवलस्य लोकाचारस्य वशवर्तिनी जाता इत्येतदेव आर्यजातेः अधःपतनस्य प्रधानमेकं कारणम्।

ज्ञानकाण्डोऽथवा वेदान्तभाग एव निष्कामकर्मणः योगस्य भक्तेः ज्ञानस्य च साहाय्येन मुक्तिप्रदः, मायासन्तारकपदे चिराय प्रतिष्ठितश्च। अपि च देशकालपात्रादिभिः सर्वथा अप्रतिहतस्थितेः स एव सार्वलौकिकस्य सार्वभौमिकस्य सार्वकालिकस्य च धर्मस्य एक उपदेष्टा।

मन्वादितन्त्रं कर्मकाण्डमाश्रित्य देशकालपात्रभेदेन सामाजिककल्याणकारिणः कर्मणः शिक्षामेव प्रधानतः प्रादात्। पुराणादितन्त्रं वेदान्तनिहितं तत्त्वसर्वस्वं स्वीकृत्य अवतारादीनां महच्चरितस्य वर्णनमुखेन तेषां तत्त्वानां विस्तृतं व्याख्यानमेव करोति, अपि च अनन्तभावमयस्य प्रभोः भगवतः कमपि कमपि भावं प्रधानीकृत्य तस्योपदेशं करोति ।

किन्तु कालवशेन सदाचारभ्रष्टा वैराग्यहीना केवललोकाचारस्था क्षीणबुद्धिः आर्यसन्ततिः, एतेषाम् भावविशेषाणां विशेषशिक्षादानाय आपातप्रतियोगी इव स्थितस्य अल्पबुद्धीनाम् मानवानां कृते बहुविस्तृतभाषायां वेदान्तगतसूक्ष्मतत्त्वानां स्थूलरूपेण प्रचारकारिणः पुराणादितन्त्रस्यापि मर्मग्रहणे असमर्था सती, अनन्तभावसमष्टिभूतम् अखण्डं सनातनधर्मं बहुखण्डेषु विभज्य साम्प्रदायिकीम् ईर्षां क्रोधञ्च प्रज्ज्वाल्य तन्मध्ये परस्परम् आहुतिदानाय सततं प्रचेष्टमाना यदा इमां धर्मभूमिम् भारतवर्षं प्रायः नरकभूमिरूपेण परिणामितवती, तदानीम् आर्यजातेः वास्तविको धर्मः क इति दर्शयितुम्, सततं विवदमानैः आपातदृष्ट्या बहुधा विभक्तैः सर्वथा विपरीताचारसङ्कुलैः सम्प्रदायैः समाच्छन्नायाः, स्वदेशीयानां भ्रान्तिस्थानभूतायाः वैदेशिकानां घृणास्पदरूपायाश्च हिन्दुधर्मनामिकायाः आ युगयुगान्तरात् विखण्डितायाः देशकालयोगेन इतस्ततो विक्षिप्तायाः धर्मखण्डसमष्टेः मध्ये यथार्था एकता कुत्रेति दर्शयितुम्, कालवशेन नष्टस्यास्य सनातनधर्मस्य सार्वलौकिकं सार्वदैशिकञ्च[3] स्वरूपं स्वजीवने निधाय सनातनधर्मस्य जीवदुदाहरणं भूत्वा लोकहिताय सर्वसमक्षं स्वजीवनं प्रदर्शयितुञ्च श्रीभगवान् रामकृष्णोऽवतीर्णः।

अनादिकालाद् वर्तमानं सृष्टिस्थितिलयकर्तुः सहयोगि शास्त्रं कथं संक्षिप्तसंस्कारे ऋषिहृदये स्वतः आविर्भवतीत्येतत् प्रदर्शयितुम्, एवम्प्रकारं शास्त्रे प्रमाणीकृते धर्मस्य पुनरुद्धारः पुनःस्थापनम् पुनःप्रचारश्च भवन्तीति धिया वेदमूर्तिः भगवान् अस्मिन् कलेवरे प्रायः सम्पूर्णत एव बहिःशिक्षायाः उपेक्षाम् अकरोत्।

वेदस्य अथवा यथार्थधर्मस्य, ब्राह्मण्यस्य अथवा धर्मशिक्षकत्वस्य च रक्षायै भगवान् भूयो भूयः शरीरधारणं करोति इत्येतत् स्मृत्यादौ प्रसिद्धम्।

प्रपतितायाः नद्याः जलराशिः समधिकवेगवान् भवति, पुनरुत्थितः तरङ्गः समधिकं विस्फारितो

[3] "अनुशतिकादीनाञ्च" (अष्टाध्यायी ७.३.२०) इति निर्दिष्टे अनुशतिकादीनाम् आकृतिगणे सर्वदेशशब्दस्य अन्तर्भावोऽस्तु। संस्कृतभूयिष्ठा वङ्गभारती, तत्र पुनः स्वामिपादैः उभयवृद्ध्या उदीरितोऽयं तत्समः शब्दः। अस्य साधुत्वप्रकाशने असामर्थ्यं कथं स्याद् व्याकरणस्य।

भवति, एवं प्रत्येकं पतनेभ्यः परम् आर्यसमाजोऽपि श्रीभगवतः कारुणिके नियन्तृत्वे विगतामयः सन् पूर्वापेक्षया अधिकतरं यशस्वी च वीर्यवांश्च सञ्जायते इत्येतद् इतिहासप्रसिद्धम्।

प्रत्येकं पतनेभ्यः परम् अस्माकं पुनरुत्थितः समाजः अन्तर्निहितं सनातनं पूर्णत्वं समधिकं प्रकाशयति। सर्वभूतान्तर्यामी प्रभुश्च प्रत्येकम् अवतारेषु आत्मस्वरूपं समधिकम् अभिव्यञ्जयति।

पुनः पुनः भारतभूमिरियम् मूर्च्छापन्ना जाता, पुनः पुनश्च भारतस्य भगवान् आत्माभिव्यक्त्या इमाम् पुनरुज्जीवयामास।

किन्तु ईषन्मात्रगतयामा गतप्राया च वर्तमानकालस्य गभीरविषादरजनी यथा, तथा काऽपि अमानिशा इतः पूर्वम् इमाम् पुण्यभूमिं न समाच्छादितवती। अस्य पतनस्य गभीरतायाः अपेक्षया प्राचीनानि पतनानि सर्वाणि गोष्पदतुल्यानि।

तस्माद् अस्य प्रबोधनस्य समुज्ज्वलतायाम् आर्यसमाजस्य पूर्वपूर्वयुगगतबोधनानि सूर्यालोके तारकावलीव महिमविहीनानि भविष्यन्ति। अपि च, तस्याः एतत्पुनरुत्थानस्य महावीर्यस्य समक्षम् पूर्वपूर्वयुगे पुनः पुनर्लब्धम् प्राचीनं वीर्यम् बाललीलाप्रायं सम्पत्स्यते।

सनातनधर्मस्य समग्रा भावसमष्टिः वर्तमाने पतनावस्थाकाले अधिकारिहीनतायाः हेतोः इतस्ततः विक्षिप्ता सती क्षुद्रक्षुद्रसम्प्रदायाकारेण क्वचिद् अंशतः परिरक्षिता, क्वचित्तु सम्पूर्णतो लुप्ता चासीत्।

अस्य नवोत्थानस्य नवबलेन बलीयसी मानवसन्ततिः तां विखण्डितां विक्षिप्ताञ्च अध्यात्मविद्यां समष्टीकृत्य स्वजीवने धारयितुम् अभ्यसितुम्, लुप्तविद्यां पुनराविष्कर्तुञ्च समर्था यथा भवेत् तथा निदर्शनाय परमकारुणिकः श्रीभगवान् वर्तमाने युगे सर्वयुगापेक्षया समधिकं सम्पूर्णम्, सर्वभावसमन्वितम्, सर्वविद्यासहायञ्च पूर्वोक्तं युगावताररूपम् प्रकाशितवान्।

अत एव अस्य महायुगस्य प्रत्यूषे सर्वभावसमन्वयः प्रचारितो भवति। किञ्च अयम् असीमोऽनन्तो भावः, यः सनातने शास्त्रे धर्मे च निहितोऽपि एतावत्कालम् प्रच्छन्न आसीत्, स पुनराविष्कृतः सन् उच्चनिनादेन जनसमाजे घोषितो भवति।

अयं नवयुगधर्मः समग्रजगतः, विशेषतः भारतवर्षस्य, कल्याणस्य निदानम्। अपि च, अयं नवयुगप्रवर्तकः श्रीभगवान् रामकृष्णः पूर्वेषां श्रीयुगधर्मप्रवर्तकानाम् पुनःसंस्कृतः प्रकाशः। हे मानव, इदं विश्वसिहि, अस्य धारणां कुरु।

हे मानव, मृतः पुनर्नायाति, गता रात्रिः पुनर्नागच्छति, विगत उच्छ्वासः पूर्वरूपम् पुनर्न प्रकाशयति, जीवोऽपि एकस्यैव देहस्य द्विर्धारणं न करोति। अत एव अतीतस्य पूजायाः युष्मान् वयं प्रत्यक्षस्य पूजां प्रति आह्वयामः, गतानुशोचनाद् वार्तमानिकप्रयत्नं प्रति आह्वयामः, लुप्तपथस्य पुनरुद्धाराय वृथा शक्तिक्षयात् सद्यो निर्मितं विशालं सन्निकटञ्च पन्थानं प्रति आह्वयामः; बुद्धिमान् अवगच्छतु।

यस्याः शक्तेः उन्मेषमात्रेण दिग्दिगन्तव्यापिनी प्रतिध्वनिः जागरिता अभूत्, तस्याः पूर्णावस्था कल्पनया अनुभूयताम्। अपि च, वृथा सन्देहं दुर्बलतां दासजातिसुलभौ ईर्षाद्वेषौ च त्यक्त्वा अस्मै महायुगचक्रपरिवर्तनाय साहाय्यं कुरुत।

वयं प्रभोः दासाः, प्रभोः पुत्राः, प्रभोः लीलायां सहायकाः इतीमं विश्वासं हृदये दृढं धारयन्तः कार्यक्षेत्रम् अवतरत।


*dīpaśikhā*/v1/2023/Swami Vedarthananda/pp. 16-18

# छात्रस्य परीक्षा

(रवीन्द्रनाथठाकुरविरचितं नाट्यकौतुकम्)

अनुवादकः – डॉ. सुकान्त-मान्ना

**(पात्राणि)**

छात्रः- मधुसूदनः। शिक्षकः- कालाचाँदः। अभिभावकः।

**छात्रः श्रीमधुसूदनः। कालाचाँद-महाशयः आचार्यः पाठयति।**

**(अभिभावकस्य प्रवेशः)**

**अभिभावकः** – कालाचाँदमहाशय, मधुसूदनः कथम् अधीते?
**कालाचाँदः** – आम्, यद्यपि महान् धूर्तो मधुसूदनः, किन्तु सबलोऽयम् अध्ययने। कदापि द्विः अध्यापनस्य आवश्यकता एव न भवति। यत् सकृत् पाठितं मया, तत् कदापि न विस्मरति।
**अभिभावकः** – तथा वा? तर्हि अद्य अस्य परीक्षां करोमि।
**कालाचाँदः** – अवश्यं क्रियताम्।
**मधुसूदनः** – (स्वगतम्) ह्यः आचार्येण तथा ताडितं येन इदानीमपि मे पृष्ठभागे वेदना अस्ति। अद्य तस्य प्रत्यर्पणं करणीयम्। अपसारयामि एव अद्य एनम्।
**अभिभावकः** – किं रे मधो! पठितं स्मरसि खलु सर्वम्?
**मधुसूदनः** – आचार्येण उक्तं सर्वं स्मरामि।
**अभिभावकः** – तथा वा? उच्यतां तर्हि- कस्तावद् उद्भिद्?
**मधुसूदनः** – उद्भिनत्ति भूमिमिति।
**अभिभावकः** – यथा?
**मधुसूदनः** – यथा किञ्चुलुकः।
**कालाचाँदः** – (रोषकषायितनेत्रः) किम्? किमुक्तम्?
**अभिभावकः** – उपविश्यतां भोः! नोच्यतां किमपि इदानीम्।

**(मधुसूदनं प्रति)**

**अभिभावकः** – त्वया पद्यं पठितं खलु? उच्यतां तर्हि- किं प्रस्फुटति कानने?
**मधुसूदनः** – कण्टकः।

**(कालाचाँदमहाशयस्य वेत्राघातः)**

**मधुसूदनः** – किम् आचार्य! ताडयति किमर्थम्? मिथ्योक्तं वा मया?
**अभिभावकः** – अस्तु, केन कर्तितः सिराज-उद्दौला? इतिहासे किमुच्यते?
**मधुसूदनः** – कीटैः।


*dīpaśikhā*/v1/2023/Dr. Sukanta Manna/pp. 19-21

**(वेत्राघातः)**

**मधुसूदनः** – आम्, विना कारणं मे ताडनं भवति? न केवलं सिराज-उद्दौला, अपि तु सम्पूर्णः इतिहासः एव कीटैः कर्तितः। पश्यन्तु।

**(प्रदर्शनम्। कालाचाँदमहाशयस्य शिरोरदनम्।)**

**अभिभावकः** – स्मरति वा व्याकरणम्?
**मधुसूदनः** – स्मरामि।
**अभिभावकः** – कः कर्ता? सोदाहरणं बोधयतु।
**मधुसूदनः** – कर्ता अपरपल्ल्याः जयमुन्शीवर्यः।
**अभिभावकः** – किमर्थम् उच्यताम्?
**मधुसूदनः** – सः क्रियां करोति।
**कालाचाँदः** – (सरोषः) तव शिरः।

**(पृष्ठे वेत्राघातः)**

**मधुसूदनः** – महोदय! तन्मे पृष्ठं, न शिरः।
**अभिभावकः** – कः षष्ठीतत्पुरुषः?
**मधुसूदनः** – न जाने।

**(कालाचाँदमहाशयस्य वेत्रदर्शनम्)**

**मधुसूदनः** – अस्य ज्ञानं तु अस्त्येव, अयं यष्टितत्पुरुषः।

**(अभिभावकस्य हासः, कालाचाँदमहाशयस्य तद्विपरीतभावः)**

**अभिभावकः** – गणितशिक्षा प्राप्ता वा?
**मधुसूदनः** – प्राप्ता।
**अभिभावकः** – अस्तु, तुभ्यं सार्धषट् मिष्टान्नानि प्रदाय उक्तं यत्- पञ्चनिमेषं यावद् भक्षणानन्तरम् अवशिष्टं ते कनिष्ठभ्रात्रे प्रदेयमिति। एकस्य मिष्टान्नस्य भोजने तव निमेषद्वयात्मकः कालः अपेक्ष्यते चेद् भ्रात्रे कति मिष्टान्नानि प्रदास्यति?
**मधुसूदनः** – न एकमपि।
**कालाचाँदः** – कथम्?
**मधुसूदनः** – सर्वमहं खादिष्यामि। दातुं न शक्नोमि।
**अभिभावकः** – अस्तु, यदि एकः वटवृक्षः प्रतिदिनं चतुर्थांश-प्राङ्गुलपरिमितं वर्धते, तर्हि यो वटः अस्य वैशाखस्य प्रथमे दिवसे दश-प्राङ्गुलपरिमितः आसीत्, परवर्तिवैशाखे तस्य कीयती वृद्धिः स्यात्?

**मधुसूदनः** – यदि वक्रता आयाति तर्हि वक्तुं न शक्यते, यदि ऋजुतया उपरि गच्छति तर्हि परिमापनेनैव ज्ञास्यते, शुष्के जाते तु वार्ता एव नास्ति।

**कालाचाँदः** – विना ताडनं बुद्धिः कार्यं न करोति। निर्गतश्रीक! ताडनेन ते पृष्ठं लोहितं करोमि, तेनैव भवान् ऋजुः स्यात्।

**मधुसूदनः** – किन्तु कदाचित् ताडनाद् ऋजुरपि वक्रायते।

**अभिभावकः** – कालाचाँदमहाशय! भ्रमोऽयं भवताम्। ताडनादिना अत्यल्पः एव साध्यते। अस्त्येव लोकप्रसिद्धिः यत्- ताडनाद् गर्धवो नाश्वायते, अपि तु बहुधा अश्व एव गर्धभायते। अधिकांशाः बालाः पठने समर्थाः, किन्तु अधिकांशाः शिक्षकाः पाठने असमर्थाः। अन्ततः ताडनेन मृतो बाल एव भवति। सवेत्रदण्डं भवता प्रस्थीयताम्। तावता कानिचन दिनानि पृष्ठमस्य मधुसूदनस्य विश्राम्यतु। ततः अहमेव पाठयामि।

**मधुसूदनः** – अहो! रक्षितः।

**कालाचाँदः** – रक्षितो महाशय! अस्य बालस्य पाठनं श्रमिककर्म। कायिकश्रममात्रम्। मासं खनित्वा एनं पञ्चैव रूप्यकाणि लभ्यन्ते। तेन श्रमेण मृत्खनने तु दश रूप्यकाणि लभ्यन्ते।



# स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः

अनुवादकौ– डॉ. राकेशदाशः, शान्तनुनायेकः

## प्रथमः खण्डः – प्रथमः अध्यायः (युगप्रयोजनम्)

### मानवः वर्तमानकाले कियान् उन्नतः शक्तिशाली चाभूत्

विद्यां, सम्पदं, पुरुषकारञ्च अवलम्ब्य मानवजीवनं वर्तमानकाले पृथिव्याः सर्वत्र कियन्तं प्रसारं लभमानम् अस्ति, तद् अतीव स्थूलदर्शिनोऽपि जनस्य सारल्येन हृदयङ्गमं भवति। मानवः कथञ्चिद् अपि क्वचिद् अपि क्षेत्रे एकस्यां सीम्नि आबद्धः स्थातुं नेच्छतीव। भूमौ जले च पर्याप्तं परिभ्रम्य अपि असुखी सः इदानीम् आधुनिकयन्त्राणि आविष्कृत्य गगनगामी संवृत्तः। तमसावृते समुद्रगर्भे, अग्निमये आग्नेयगिरिगर्भे च अवतीर्य सः स्वीयं कुतूहलं निवर्तयामास। चिरं हिममण्डितं पर्वतं समुद्रतटं च गत्वा सः तादृशानां सर्वेषां प्रदेशानां यथायथं रहस्यावलोकने समर्थः अभूत्। पृथिवीस्थानां क्षुद्रदीर्घाकाराणां सर्वेषां लतौषधिपादपानाम् अन्तः स्वस्मिन् इव प्राणस्पन्दनस्य परिचयं प्राप्नोत् सः, सर्वविधान् प्राणिनः स्वीयप्रत्यक्षेण विचारचक्षुर्भ्यां च विज्ञाय ज्ञानसिद्धिरूपं स्वीयम् उद्देश्यं प्रति संसरति। तथैव क्षित्यप्तेजआदीनां पञ्चभूतानाम् उपरि आधिपत्यं कृत्वा सः अधुना स्थावरात्मिकायाः पृथिव्याः सर्वान् विषयान् अज्ञासीत्। तत्रापि असन्तुष्टः सुदूरस्थानां ग्रहनक्षत्रादीनां समुचितां वार्तां प्राप्तुम् उत्सुकः क्रमेण तत्रापि कृतकार्यताम् अनुभवति। अन्तर्जगत्परिदर्शनेऽपि तस्य उत्सुकतायाः अभावः न परिलक्ष्यते। भूयोदर्शनं गवेषणञ्च अवलम्ब्य तस्मिन् क्षेत्रेऽपि मानवः नूतनानि सर्वाणि तत्त्वानि नित्यम् आविष्करोति। जीवनरहस्यस्य अनुशीलनं कुर्वन् सः एकजातीयस्य प्राणिनः अन्यस्यां जातौ परिणतेः क्रमाभिव्यक्तेः वा विषयं जज्ञौ; शरीरस्वभावस्य मनस्स्वभावस्य च आलोचनपूर्वकम् आद्यन्तवति सूक्ष्मस्थावरोपादाने मनसः संरचनायाः तत्त्वनिर्णयाय समर्थः अभवत्; जडजगतः इव अन्तर्जगतः प्रत्येकं घटना अलङ्घ्यनियमसूत्रानुसारेण ग्रथिता इत्यवागच्छत्, आत्महननादिषु असम्बद्धेषु सर्वेषु मानसिकव्यापारेष्वपि सूक्ष्मानुशासनस्य परिचयं प्रापत्। पुनः वैयक्तिकजीवनस्य चिरास्तित्वविषये निश्चयरूपेण प्रमाणलाभे समर्थो न भवति चेद् अपि इतिहासालोचने मानवः तस्य जातिगतजीवनस्य क्रमोन्नतिं प्रत्यक्षीकृतवान्। वैयक्तिकजीवनस्य सार्थकतां तादृशरूपेण जातिगतजीवने दृष्ट्वा सः इदानीं तस्य सफलतायै विज्ञानं संहतचेष्टाञ्च अवलम्ब्य अज्ञानेन सह चिरसङ्ग्रामे निरतः दृश्यते। तथा च अनन्तसङ्ग्रामेषु अनन्तां प्रगतिं कल्पयन् बाह्याभ्यन्तरराज्यानां दुर्लक्ष्यप्रदेशान् प्राप्तुम् अनन्तवासनाप्रवाहे आत्मनः जीवनतरीम् अप्लावयत्।

### तादृश्याः उन्नतेः शक्तेश्च मूलं पाश्चात्याद् आप्राच्यं भावविस्तारः

पाश्चात्त्ये मानवम् अवलम्ब्य पूर्वोक्ते जीवनप्रसारे विशेषरूपेण उदिते सत्यपि भारतप्रभृतिषु सर्वेषु प्राच्यराष्ट्रेष्वपि तस्य प्रभावः स्वल्पम् अपि न लक्ष्यते। विज्ञानस्य अजेयशक्त्या प्राच्यपाश्चात्त्यप्रदेशौ प्रतिदिनं यावद् निकटतां प्राप्नुतः, प्राच्यमानवस्य प्राचीनं जीवनसंस्कारकदम्बकं तावद् एव परिवर्त्य पाश्चात्त्यमानवाकारेण आविर्भवति। पारस्य-चीन-जापान-भारतवर्षादिदेशानां वर्तमानस्थितेः आलोचनेनैव तद् अवगन्तुं शक्यते। भाविनि काले परिणामः यः कश्चिद् भवतु, प्राच्यस्योपरि पाश्चात्त्यस्य

तादृशभावविस्तारविषये न सन्देहस्य अवकाशलेशः, सर्वस्याः अपि पृथिव्याः कालेन पाश्चात्त्यभावेन भावनम् अवश्यम्भावि इत्यनुभूयते।

## पाश्चात्त्यमानवस्य जीवनं दृष्ट्वा तादृश्याः उन्नतेः भाविपरिणामः निर्णेतव्यः

पूर्वोक्तप्रसारस्य परिणामः निर्णेयश्चेद् अस्माभिः प्राधान्येन पाश्चात्त्यः एव अवलम्बनीयः। युक्तिम् अवलम्ब्य पाश्चात्त्यमानवस्य जीवनं विमर्ष्टव्यम्। तादृशप्रसारस्य मूलं कुत्र, कीदृशः चास्य स्वभावः, तस्य प्रभावेन पाश्चात्त्यजीवनस्य पूर्वेषाम् उत्तमाधमानां सर्वेषां भावानां उन्नतेः विलोपस्य परिणामः कियान्, तस्माच्च पाश्चात्त्यव्यक्तिमनसि सुखस्य दुःखस्य वा कियती वृद्धिः न्यूनता वा सञ्जाता इति अन्वेषणीयम्। पाश्चात्त्यजीवनस्य व्यष्टौ समष्टौ वा तस्य परिणामः सकृद् निर्णीतश्चेत् स्थानकालयोः भेदे सति अन्यत्र एतादृशनिर्णये क्लेशो न स्यात्।

## पाश्चात्यमानवस्य उन्नतेः कारणम् इतिहासश्च

इतिहासः स्पष्टाक्षरेण निर्दिशति, दुःसहशैत्यस्य प्रकोपः बहुप्राचीनकालात् प्रभृति पाश्चात्त्यमानवमनसि शारीरबुद्धेः दार्ढ्यं समपादयत्। तेन एकतः यथा स स्वार्थपरः अभवत्, तथैव अपरतः संहतचेष्टया एव स्वार्थसिद्धिः भवति इति सारल्येन अवबुध्य स्वजातिप्रीतिं दृढीकृतवान्। तादृशी स्वार्थिता स्वजातिप्रीतिश्च कालक्रमेण अजेयोत्साहेन अन्याः सर्वाः जातीः पराजित्य तासां धनसम्पदा स्वजीवनं भूषयितुं तं मानवं प्रेरयति। तेन सः यदा स्वीयं जीवनव्यवहारं किञ्चित् क्लेशहीनम् अकरोत्, तदैव शनैः शनैः तस्मिन् अन्तर्दृष्टिः आविर्भूय क्रमेण विद्यायाः सद्गुणस्य च सम्पादने तं प्रैरयत्। एवं जीवनयुद्धं विहाय अन्येषु सर्वेषु उत्कृष्टविषयेषु तस्य दृष्टिः यदा अपतत् तदा तस्य लक्ष्यस्य प्राप्तौ अन्तरायरूपेण धर्मविश्वासं पुरोहितानाञ्च प्राबल्यं समुपस्थितम्। विद्याशिक्षया श्रीभगवतः अप्रसादः, तेन च अनन्तनिरयप्राप्तिः भवेद् इति वदद्भिः पुरोहितैः तावता एव न सन्तुष्य च्छलेन बलेन कौशलेन च तस्मिन् अध्वनि गमने अपि व्याघातः जन्यत इति आविष्कृतम्। तदा स्वार्थसाधनतत्परस्य पाश्चात्त्यमानवस्य कर्तव्यनिर्धारणे विलम्बः न जातः। बलवता हस्तेन पुरोहितं दूरे निक्षिप्य स्वीयं गन्तव्यस्थानम् अभिलक्ष्य गमनं प्रारभत। इत्थं धर्मयाजकैः सह शास्त्रं धर्मविश्वासञ्च दूरम् अपहाय पाश्चात्त्याः नूतनपथा स्वीयं जीवनं परिचालयन्ति। पञ्चेन्द्रियग्राह्यतारूपेण सुनिश्चितप्रमाणेन निश्चयं विना कदापि कस्मिन्नपि विषये विश्वासः, कस्यापि वा विषयस्य ग्रहणं न कर्तव्यम् इति एतद् एव तस्य मूलमन्त्रः अभूत्।

इन्द्रियप्रत्यक्षे आधृतैः विचारानुमानादिभिः विषयविशेषस्य सत्यासत्यतानिरूपणं कर्तव्यम् इति निश्चितवन्तः पाश्चात्त्याः इतःपरं युष्मत्प्रत्ययगोचरस्य विषयस्य उपासका अभूवन्, तथा अस्मत्प्रत्ययगोचरं विषयिणम् अपि विषयेषु अन्यतमं मत्वा तस्य स्वभावादिकम् अपि पूर्वोक्तैः प्रमाणैः ज्ञातुम् इच्छति। चतस्रः शताब्दीः सः इत्थम् एकैकां लौकिकीं व्यक्तिं लौकिकं विषयं वा पञ्चेन्द्रियैः परीक्ष्य गृह्णाति, तस्मिन्नेव काले वर्तमानयुगस्य भौतिकशास्त्रं शैशवस्य जडतायाः असहायतायाश्च मुक्तं सद् यौवनस्य उत्साहेन, आशया, आनन्देन, बलोन्मत्ततया च उपतिष्ठते।

## आत्मविज्ञानविषये पाश्चात्त्यमानवस्य मौर्ख्यम् एव तत्कारणम्; तस्मात् तन्मनसि अशान्तिश्च

किन्तु भौतिकशास्त्रस्य सविशेषम् औन्नत्यं साधितं चेद् अपि, पूर्वोक्ता नीतिः आत्मविज्ञानविषये पाश्चात्त्यमानवाय पन्थानं नादर्शयिष्ट। यतो हि संयमः स्वार्थहीनता अन्तर्मुखता चैव तादृशस्य


*dīpaśikhā*/v1/2023/Dr. Rakesh Das, Santanu Nayek/pp. 22-24

विज्ञानलाभस्य एकः एव मार्गः, निरुद्धवृत्तमनश्चैव आत्मोपलब्धेः एकम् एव यन्त्रम्। अत एव, बहिर्मुखपाश्चात्त्यः तस्मिन् विषये पन्थानं विस्मृत्य प्रतिदिनं देहात्मवादी नास्तिकोऽभूद् इत्यत्र न किमपि आश्चर्यम्। तस्माद् ऐहिकभोगसुखम् एव पाश्चात्त्यस्य समीपे सम्प्रति सर्वस्वरूपेण परिगण्यते तल्लाभायैव सः सविशेषं नित्यं प्रयत्नवान् अस्ति; तस्य विज्ञानलब्धं भौतिकज्ञानञ्च प्राधान्येन तस्मिन्नेव विषये प्रयुक्तं सत् तं प्रतिदिनम् आडम्बरयुक्तं स्वार्थिनञ्च करोति। तस्माद् एव द्रष्टुं शक्यते यत्, पाश्चात्त्ये सुवर्णम् आदाय जातिभेदः, प्रलयविषाणनादिनः करालाः शतघ्नी-नालीका[४]दयः, असाधारणलक्ष्म्याः पार्श्ववर्ती दारिद्र्यजातः असन्तोषः, घोरा धनतृष्णा च, परराज्याधिकारः परजातिप्रपीडनादयश्च। अतः एव एतद् अपि द्रष्टुं शक्यते यत्, भोगसुखस्य अन्तम् उपस्थिताः सन्तः अपि पाश्चात्त्यानां नराणां स्वीयः अभावः न लुप्यते, मरणाद् अनन्तरञ्च जातिगतास्तित्वे विश्वासमात्रम् अवलम्ब्य ते कथञ्चिद् अपि सुखिनः न भवन्ति। विशिष्टानुसन्धानात् पाश्चात्त्याः अधुना अवागच्छन् यत्, पञ्चेन्द्रियजनितेन ज्ञानेन ते देशकालातीतस्य वस्तुतत्त्वस्य आविष्काराय न प्रभविष्यन्ति। विज्ञानं पाश्चात्त्याय केवलं क्षणिकाभासं प्रदद्यात्। किन्तु विज्ञानेन तस्य ग्रहणम् अवबोधश्च दुरासदम् इति बोधयित्वा एव विज्ञानं निवर्तते। अतः यस्य देवस्य शक्त्या पाश्चात्त्याः स्वम् एतावत्कालपर्यन्तं शक्तिमन्तम् अचिन्तयन्, यस्य प्रसादाच्च तस्य सर्वा भोगश्रीः, सम्पच्च विराजते, तस्य देवस्य पराजयात् पाश्चात्त्यमानवस्य हृदयस्पर्शी विलापः प्रत्यहं वर्धमानोऽस्ति, आत्मानम् अतीव असहायम् उपायरहितं मनुते।



[४] Canons and guns

# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

## ब्रह्मचारिणा मनोमयेन अनूदितम्

दक्षिणेश्वरे श्रीरामकृष्णदेवः तस्य सुदीर्घसाधनायाः समापनान्ते त्यागिभक्तैः साकं सम्मेलनवासनया एकदा श्रीश्रीजगन्मातुः श्रीचरणारविन्दयोः न्यवेदयत्– 'विषयिभिः संसारिभिः जनैः सह वार्तालापेन मम जिह्वा ज्वलन्ती अस्ति।' जगन्माता तम् आश्वासितवती– 'मा भैषीः, त्यागिनः शुद्धसात्त्विकभक्ताः आगमिष्यन्ति' इति। परिणामेन यथाकालं त्यागिनः युवानः आगच्छन्तः आसन्। एतेषु अन्तरङ्गेषु श्रीयुक्तः राखालः आसीद् अत्युन्नतस्तरीयः। सः स्वल्पसङ्ख्यकानाम् ईश्वरकोटीनाम् अन्यतमः, ठाकुरस्य मानसपुत्रश्च आसीत्। जगन्माता तस्य आगमनवार्तां पूर्वम् एव श्रीरामकृष्णदेवं ज्ञापितवती आसीत्। ठाकुरः विवृणोति स्म यत्– "राखालस्य आगमनस्य कतिपयदिवसेभ्यः प्राग् अहम् अद्राक्षं, जगन्माता बालकम् एकं सहसा मम क्रोडे स्थापयित्वा अवदत्, 'एषः तव पुत्रः'। एतच्छ्रवणानन्तरं शङ्कितः कातरः सन् अवदम्– 'किं वदसि? मम पुनः पुत्रः?', तदा सा हसन्ती ज्ञापितवती– 'साधारणसंसारिभावेन उत्पन्नः पुत्रः न, त्यागी मानसपुत्रः। तदा आश्वस्तः अभवम्। अस्माद् दर्शनात् परं राखाले आगते अहम् अवगतवान्– एषः एव सः बालकः।"

१८६३ खृष्टाब्दस्य जनवरीमासे मङ्गलवासरे (१२६९ वङ्गाब्दस्य माघमासस्य अष्टमे दिनाङ्के, चान्द्रमाघे शुक्लद्वितीयायां तिथौ, रात्रौ प्रायः एकवादने) वसिरहाट्-मण्डलान्तर्गते शिकडाकुलीनग्रामे अतिसम्भ्रान्तवंशे राखालचन्द्रघोषः जन्म अलभत। तस्य पिता आनन्दमोहनघोषः समृद्धः भूस्वामी आसीत्। यदा सः पञ्चमवर्षीयः तदा तस्य माता कैलासकामिनी परलोकं गतवती। अतःपरं पिता द्वितीयं विवाहं कृतवान्। विमातुः हेमाङ्गिन्याः स्नेहमये क्रोडे राखालचन्द्रः परिपाल्यमानः आसीत्।

उपयुक्ते वयसि राखालचन्द्रस्य विद्याभ्यासनिमित्तम् आनन्दमोहनः गृहस्य समीपम् विद्यालयम् एकं प्रतिष्ठाप्य, राखालं तत्र प्रावेशयत्। तत्र बालकस्य सौम्यसुन्दराकृत्यां माधुर्यमयकोमलप्रकृत्यां च छात्राः शिक्षकाश्च सर्वे आकृष्टाः अभवन्। किञ्च अत्यल्पदिनाभ्यन्तरे एव सः सहपाठिनां नेतृत्वम् अलभत। अध्ययनादिषु अपि तस्य विशेषबुद्धिमत्ता अभिज्ञाता। स्वभावेनैव राखालः बन्धुवत्सलः आसीत्। शिक्षकाः छात्रान् ताडयन्ति चेत् सः समवेदनया अभिभूतः भवति स्म। परिणामतः शिक्षकाणाम् अन्तः अपि क्रमेण कोमलतायाः सञ्चारः अभूत्, ततः ते तादृशं गर्हितम् अभ्यासं त्यक्तवन्तश्च। विद्यालयस्य पाठं विहाय, अन्येषु विषयेषु अपि राखालस्य उत्साहः आसीत्। क्रीडादिषु तेन सदृशः यथा कोऽपि नासीत्, मल्लक्रीडायाम् अपि तथैव। ग्रामस्य विभिन्नासु प्रतिस्पर्धासु सः असाधारणं नैपुण्यं प्रदर्शयति स्म। पितुः इव तस्य अपि पुष्पफलोद्यानेषु विशेषप्रीतिः बाल्यकालाद् एव परिलक्ष्यते स्म। एतद् विहाय पुष्करिण्याः पार्श्वे उपविश्य ततः बडिशेन मत्स्याहरणम् अपि तस्य कृते प्रमोदस्य विषयः आसीत्।

एवं चिन्तनं दोषाय भवति यत्, साधारणः बालकः इव सः क्रीडादिषु केवलं मत्तः अतिष्ठद् इति। ग्रामस्य उपकण्ठे कालीमन्दिरस्य समीपे बोधनास्थाने[५] सः कदाचिद् बालकैः साकं निजनिर्मितस्य श्यामाकालीविग्रहस्य पूजादिषु निमग्नः भवति स्म। पुनः तस्य गृहे प्रतिवत्सरं यदा शारदीयदुर्गामहोत्सवः उद्याप्यते स्म, तदा पूजामण्डपे पूजकानां पृष्ठभागे उपविश्य पूजां पश्यन् तन्मयः भवति स्म, किञ्च सायङ्काले अनिमेषनयनाभ्यां मातुः आरात्रिकं पश्यन् कस्मिंश्चिद् अज्ञाते प्रदेशे आत्मानं लोपयति

[५] यत्र शारदीयदुर्गापूजासमये देव्याः बोधनकृत्यं सम्पाद्यते तत् स्थानम्


*dīpaśikhā*/v1/2023/Brahmachari Manamoy/pp. 25-26

स्म। सङ्गीते तस्य महती प्रीतिः आसीत्। तदा तदा ग्रामाद् बहिः एकस्मिन् निभृते स्थाने मित्रैः साकं श्यामासङ्गीतं गायन् एतावतीं तन्मयतां प्राप्नोति स्म यद् देशकालज्ञानम् अपि अलुप्यत। कस्यचिद् अपि कण्ठे नूतनं श्यामासङ्गीतं शृणोति चेत् तत्सकाशात् सः तत्सङ्गीतम् अशिक्षत, पुनः वैष्णवभिक्षुकाणां कण्ठे वृन्दावनस्य मुरलीधरस्य वाहीकराजस्य गीतं श्रुत्वा सः आत्मस्थः भवति स्म।

पाठशालायाः पाठं समापितवन्तं द्वादशवर्षीयं तं आङ्गलेय्याः शिक्षायाः अध्ययनार्थं कलिकाताम् आनीतवान् पिता वाराणसीघोषस्ट्रिट्-नामकस्थे स्वस्य द्वितीयपक्षीयश्वशुरालये वासं परिकल्प्य समीपवर्तिनं 'ट्रेनिं एकाडेमि' नामकं विद्यालयं प्रेषयामास (१८७५ खृष्टाब्दे)। अस्मिन् समये नरेन्द्रनाथेन सह तस्य प्रथमपरिचयः जातः। भावी विश्वविजयी स्वामी विवेकानन्दः तदा पल्लीबालकानां नेता। विद्यालये राखालस्य नरेन्द्रनाथस्य च त्रिचतुरैः वर्षैः अन्तरम् आसीत्, किन्तु तयोः वयः समानम् एव आसीत्। दर्शनेन एव राखालः नरेन्द्रम् अभि आकृष्टोऽभवत् किञ्च उभयोः सख्यम् उदितम्। द्वावपि एकस्मिन्नेव मल्लक्रीडाङ्गने मिलित्वा मल्लक्रीडाम् अभ्यस्यतः स्म। पुनः वयसि विवृद्धे नरेन्द्रस्य आकर्षणेन युगपद् ब्राह्मसमाजम् अपि अगच्छताम्। इत्थं विविधसंस्थाभिः सम्बन्धवशाद् अध्ययनस्य हानिं परिलक्ष्य चिन्ताग्रस्तः पिता आदौ अनुरोधोपरोधाभ्यां, तत्र च विफलः सन् कठोरानुशासनेन अध्ययने पुत्रस्य मन आकर्षयितुम् अयतत। किन्तु फलम् अनभिलक्ष्य उपायान्तरं च अप्राप्य परिजनैः परामृश्य निरचिनोद् यत्, विवाह एव अस्य प्रकृष्टः प्रतिकारः। घटनानां क्रमेण शीघ्रम् अभीष्टा वधूः अपि प्राप्ता। कोन्नगराभिजनः श्रीयुतः मनोमोहनमित्रः तदा कलिकातायां काँसारिपाडायाः समीपे सिमुलियापल्ल्यां न्यवसत्। तस्य विश्वेश्वरी इति सर्वसुलक्षणा विवाहयोग्या भगिनी अभूत्। १८८१ खृष्टाब्दस्य मध्यभागे सम्भ्रान्तकायस्थकुलोद्भूतया तया कन्यया राखालस्य परिणयः सम्पन्नः। विश्वेश्वरी तदा अपि बालिका– वयः एकादशवर्षाणि अतिक्रान्तम्।

मानवाः स्वाभिप्रायसिद्ध्यर्थं जगति बहु किमपि कुर्वन्ति, परन्तु विधेः विधानेन फलं भिन्नम् एव फलति। राखालस्य पिता परिणयं कारयित्वा राखालं मायाबन्धनेन बद्धुम् अचेष्टत, परन्तु अयं परिणयः एव शीघ्रं राखालं दक्षिणेश्वरम् आनयत्। राखालस्य ज्येष्ठः श्यालकः मनोमोहनः प्राग् एव श्रीरामकृष्णस्य चरणम् आश्रितवान्। धर्मशीला श्वश्रूमाता अपि श्रीरामकृष्णं प्रति श्रद्धालुः आसीत्। विवाहात् परं कोन्नगरात् कलिकातां प्रत्यावर्तनकाले मनोमोहनः श्वशुरगृहागतं राखालं दक्षिणेश्वरम् आनीतवान्।

अस्मै शुभलग्नाय जगदम्बा पूर्वम् एव श्रीरामकृष्णस्य मनः प्रस्तुतवती आसीत्। एकस्मिन् दिवसे ठाकुरः भावचक्षुषा ददर्श, वटवृक्षमूले कश्चिद् बालः स्थितः अस्ति। मनसि काचिद् आशङ्का उदिता, किमर्थम् एतादृशं दर्शनं जातम् इति? भागिनेयं स्वहृदयगतं सन्देहं यदा ज्ञापितवान्, तदा सोल्लासं हृदयः उक्तवान्, "मातुल, तव सन्तानः भविता– तस्माद् एतादृशं दर्शनं जातमि"ति। शुद्धः अपापविद्धः महापुरुषः चमत्कृतः सन् अगदत्, "किमुच्यते त्वया? मम मातृयोनिः, पुनः मम सन्तानः कथं भविता?" अस्य प्रश्नस्योत्तरदानं हृदयेन न शक्तं, परन्तु जगदम्बा अदात्। प्रसङ्गः प्रबन्धस्य प्रारम्भे एव उल्लिखितः। प्रतीक्षमानस्य शुद्धसत्त्वस्य मानसपुत्रस्य राखालस्य आगमनात् प्राग् एकद्युः भावचक्षुषा ठाकुरः दृष्टवान्– सहसा गङ्गावक्षसि शतदलानि पद्मपुष्पाणि प्रस्फुटन्ति स्म। तेषां दलेषु अपूर्वा शोभा विराजते। चिरकिशोरस्य वाहीकराजस्य श्रीकृष्णस्य हस्तधारणपूर्वकं तदनुरूपः कश्चिद् बालकः पादयोः नूपुरं धारयन् शतदलेषु नृत्यति स्म। नृत्यस्य अपूर्वच्छन्दसि माधुर्यसिन्धोः उच्छ्वासः। इदं परिलक्षयन् श्रीरामकृष्णः आत्मनिमग्नः अभवत्। अस्मिन् समये एव राखालचन्द्रः आविर्बभूव। विस्मयेन श्रीरामकृष्णः दृष्टवान्, एषः एव तेन दृष्टचरः वटवृक्षमूले स्थितः बालकः, जगदम्बया प्रदर्शितः मानसपुत्रः, कमलदले नृत्यपरायणः व्रजकिशोरः कृष्णसखा, सः सर्वं दृष्टवान्,

सर्वं स्मृतवांश्च, परन्तु आत्मतृप्तः महामानवः बहिः कम् अपि आवेगोच्छ्वासादिकं न प्रकाशितवान्। गाम्भीर्येण अनिमीलितचक्षुषा राखालं निरीक्ष्य मित्रं मनोमोहनम् उक्तवान्, “सुन्दरः आधारः।” अतःपरम् अतिपरिचितः इव तेन सह स्नेहसम्भाषणम् आरब्धवान्, “तव नाम किम्?”
– “श्रीराखालचन्द्रघोषः।”



# ब्रह्मानन्दस्वामिना सङ्कलितः श्रीश्रीरामकृष्णोपदेशः

ब्रह्मचारिणा शुभदीपेन अनूदितः

## विषयः - आत्मज्ञानम्

१. मनुष्यः आत्मानं जानाति चेद् भगवन्तम् अपि ज्ञातुं शक्नोति। अहं कः इति सम्यग् विचारिते ज्ञायते यत्, अहम् इति किम् अपि वस्तु नास्ति। हस्तः, पादः, रक्तं, मांसम्, इन्द्रियाणि एतेषु कतमः अहम्? यथा पलाण्डोः वल्कलं निष्कासयामश्चेत् केवलम् वल्कलम् एव निःसरति, सारवस्तु किञ्चिद् न भवति, तथा विचार्यते चेत् अहन्ता नाम किमपि न प्राप्यते। अन्ते यत् तिष्ठति, तदेव आत्मचैतन्यम्। 'ममत्वाभिमानः' 'अहन्ता' दूरं गच्छति चेद् भगवतः साक्षात्कारः भवति।

२. अहन्ता द्विधा भवति। पक्वाहन्ता एका, आमाहन्ता अपरा। अहं तस्य दासः, तस्य सन्तानः, एवम् अहं नित्य-मुक्त-ज्ञानस्वरूपः इति पक्वाहन्ता।

३. कश्चित् तम् अपृच्छत्, 'एकेन वाक्येन ज्ञानं सम्पद्येत इत्येवं माम् उपदिशतु।' तेन कथितम्, 'ब्रह्म सत्यं जगन्मिथ्या' इति धारणां करोतु। एतावद् उक्त्वा तूष्णीम् अवास्थात्।

४. यावच्छरीरम् 'अहम्' 'मम' इति अभिमानः पूर्णतया न अपगच्छति, लेशमात्रं तु तिष्ठत्येव। यथा नारिकेलवृक्षस्य पत्रवृन्तं पतति चेद् अपि, तस्य चिह्नं तु तिष्ठत्येव। परन्तु इयम् अल्पा अहन्ता मुक्तस्य पुरुषस्य बन्धने न समर्था।

५. नग्नं तोतापुरीमहाशयं परमहंसदेवः अपृच्छत्, "तव या अवस्था, तत्र प्रत्यहं ध्यानस्य का आवश्यकता?" तोतापुरीवर्यः प्रत्युत्तरितवान्, "घटः नित्यं न मृज्यते चेत् कलङ्कः स्यात्। नित्यं ध्यानाभ्यासः न क्रियते चेत् चित्तं मलिनं भवति।" परमहंसदेवः उदतरत्, "हेमघट्यां तु न भवति।" अर्थात् सच्चिदानन्दे प्राप्ते साधनम् अनावश्यकम्।

६. विचारस्य प्रकारद्वयं ज्ञायताम्– अनुलोमेन विलोमेन। यथा– वल्कलेनावृतः सारः, पुनश्च, सारस्य एव वल्कलम्।

७. अस्मत्प्रत्यये सति युष्मत्प्रत्ययः अपि स्थास्यति। यथा प्रभाज्ञानवतः तमसः ज्ञानम् अपि भवति; यस्य पापज्ञानम् अस्ति, तस्य पुण्यज्ञानम् अपि वर्तते; यस्य शुभम् इति ज्ञानं वर्तते तस्य अशुभम् इति बोधोऽपि अस्ति।

८. पादयोः उपानहं धृतवान् जनः स्वच्छन्दं कण्टकाकीर्णे मार्गे चलितुं शक्नोति, तथैव तत्त्वज्ञानरूपम् आवरणं धृत्वा मनः अस्मिन् कण्टकाच्छन्ने संसारे विचरितुं शक्नोति।

९. कश्चन साधुः सर्वदा ज्ञानोन्मत्तः तिष्ठति स्म, केनापि सह वार्तालापं न करोति स्म, जनाः तम् उन्मत्तं मन्यन्ते स्म। एकस्मिन् दिवसे सः लोकालयम् आगत्य भिक्षान्नम् आनीय, एकस्य शुनकस्य उपरि उपविश्य तद् भिक्षान्नं स्वयं खादन् शुनकं च खादयन् आसीत्। तद् दृष्ट्वा बहवः जनाः तत्र उपस्थिताः अभवन्। तेषु केचन तम् उन्मत्तं वदन्तः उपहसितवन्तः। एतद् दृष्ट्वा सः साधुः तान् जनान् उक्तवान्, किमर्थं भवन्तः हसन्ति?

विष्णूपरि स्थितो विष्णुः, विष्णुः खादति विष्णवे।
कथं हससि रे विष्णो, सर्वं विष्णुमयं जगत्।

१०. यावत् तत्र तत्र (अर्थाद् बहिः), तावद् अज्ञानम्; यदा अत्र अत्र (अन्तरभिमुखम्), तदा ज्ञानम्। यस्य अत्र (हृदये) अस्ति, तस्य तत्र (भगवच्चरणे स्थानम्) अपि अस्ति।